N. C. THAKUR

## The Symbolism of Virginia Woolf

IN THIS BOOK Mr Thakur has made a study of the way Virginia Woolf uses symbolism in the characters, action, and setting of her novels. He shows, by reference to her essays and her diary, how she attached great importance to symbolism as a necessary instrument for a writer to express ideas and visions which cannot be embodied in any other way. He then considers each of her novels in turn, demonstrating the different ways in which she used symbols for the varying needs of her art. In doing this he sheds fresh light on a novelist who is sometimes thought of as difficult. As the author says, 'the understanding of Virginia Woolf's novels becomes easier, and the enjoyment of them greater if we realize the significance of her symbols'. *30s*

## English Short Stories of Today

*THIRD SERIES*

*Selected for the English Association by* T. S. DORSCH

LIKE its two predecessors in the series, this volume of *English Short Stories of Today* aims at providing a selection of the best short stories that have been published in England within the period it covers, that is, the years between 1955 and 1963. It contains, among others, stories by H. E. Bates, Rhys Davies, L. P. Hartley, Mary Lavin, Viola Meynell, William Sansom, and Angus Wilson—authors who must be reckoned among the best short-story writers of our time—and some of the best of the post-war Commonwealth writers. Australia is represented by Dal Stivens, Canada by Morley Callaghan, India by R. Prawer Jhabvala, New Zealand by Maurice Shadbolt, Nigeria by David Owoyele, South Africa (for its past position in the Commonwealth) by Nadine Gordimer, and the West Indies by George Lamming. *11s 6d*

OXFORD UNIVERSITY PRESS

# Journal
OF THE
# University of Bombay

[ ARTS NUMBER ]

VOL. XXXIV (New Series) SEPTEMBER 1965 PART 2

CONTENTS

ARTICLES

| | | PAGE |
|---|---|---|
| THE AŚVINS IN THE ṚGVEDA AND THEIR TRACES IN THE LATER LITERATURE PART I | K. P. JOAG | 1 |
| SOCIAL IMPLICATIONS OF THE BHAGAVADGĪTĀ | DR. P. M. UPADHYE | 66 |
| CĀRUDATTA : AN AMṚTĀNKA NATAK | DR. G. K. BHAT | 78 |
| UTPREKṢAS OF BĀNABHATTA | DR. (MISS) G. V. DAVANE | 87 |
| BUDDHIST NUNS AND DISCIPLINARY RULES | DR. (SMT.) M. V. TALIM | 98 |
| SRI ŚANKARĀBHYUDAYMAHAKĀVYAM | DR. W. R. ANTARKAR | 138 |
| EARLY INDIAN IMPRINTS IN THE UNIVERSITY LIBRARY MARATHI AND GUJARATI | | 188 |

BOOK REVIEWS

| | |
|---|---|
| KAVI KAUMUDI | 229 |
| AN INTRODUCTION TO ARCHAEOLOGY | 230 |
| PUṢPADANTA : MAHIMNASTAVA OR PRAISE OF SHIVA'S GREATNESS | 230 |
| BĀṆA | 232 |

## ॥ श्रीशङ्कराभ्युदयमहाकाव्यम् ॥

BY

तिरुमल दीक्षित

EDITED BY

DR. W. R. ANTARKAR, M.A., LL.B., PH.D.

# INTRODUCTION

THE second work to be considered is Śaṅkarābhyudaya by Tirumala Dīxit. The present edition of the work is based on a transcript copy of a ms. of the same lying in the Mss. Library of the Oriental Research Institute, Mysore, the only library to possess this work. The copy abounds in obvious and very ordinary mistakes of grammar, only some of which have been corrected by the comparer. An attempt has been made by us to correct others as far as we could. In many places, syllables and even words have been omitted. We have tried to restore or suggest such as seemed possible and reasonable but have shown them by enclosing them into brackets. The space of those that could not be so restored has been left blank. Better roadings, where found possible, have been given in the foot-notes. The work as available today is incomplete and breaks off after st. 27 of Ch. VII.

AUTHOR :

The colophons at the end of the chapters are the only source of our information about the author. We learn from them that (1) he belonged to the Bhāradvaja Gotra, (2) his father's name was Tirumala Koṇḍopādhyāya and that (3) he was the disciple and devotee of one Parama Śivendra, who seems to have been his Guru or spiritual preceptor. The present work seems to be the only one written by him since he makes no reference to any other in the six and odd chapters thereof.

DATE :

The work itself affords no clue to the date of its composition except the reference to Parama Śivendra. We know of a person of this name as the 57th head of the Kāñcī-Kāmakoṭī Pīṭha, which, according to their records, he occupied between 1539 A.D., and 1586 A.D. If this is true, the author of our present work can be assigned to the middle or latter half of the 16th century A.D.

An external piece of evidence points to the same conclusion thus :

Mādhava, in his Śaṅksépa Śaṅkara Jaya (popularly known as Śāṅkara Digvijaya of Śrī Vidyāraṇya Muni), has about 475 stanzas

in common with the present work of Tirumala Dīxit. In our opinion, Mādhava has borrowed from the latter and not vice-versa. Mādhava has also borrowed from another work called Śaṅkarābhyudaya by Rājacūḍāmaṇi Dīxit, who has been assigned to the middle of the 16th Century A.D. (Vide Prof. B. Upādhyāya's Śri Śaṅkarācārya, p. 11). Mādhava has, therefore, to be placed after this period. Tirumala Dīxit, therefore, who has been drawn upon by Mādhava, must have come before 1650 A.D.

THE NATURE OF THE WORK :

The work purports to be a biography of Śrī Śaṅkarācārya, only a few of whose deeds have been described, it being impossible to describe all. Previous biographers of Śaṅkara have been mentioned but without their names being specified. The work is divided into Sargas written in different metres like Anuṣṭubh (Ch. I—stt. 1 to 100); Āryā (VI: 95, 97, 100), Praharṣinī (VI: 42 to 44), Viyoginī (II 1 to 7, 12 to 17), Svāgatā (III : 1 to 5), Upajāti (IV 19 to 23 36 to 28), and many others like Mālinī, Śālini, Mandākrāntā, Vasantatilakā, Śārdūlavikrīḍita, Indravajrā, Drutavilambita, Hariṇī, and c. The style is matter-of-fact and straight-forward and though there are many figures of speech used, it is free from highly poetical embellishments. As is usual with the biographers in general, our poet also lapses occasionally into the mythical strain of narration but anticipates very little, if at all, coming events.

This work is eminently useful for a comparative study of Mādhava's work, referred to above. As stated already, Mādhava's works comes later and is indebted to the present one to a great extent. The arrangement of the story in T. Dīxit's work is much simpler than the one in that of Madhava and some of the stories (e.g. Cāṇḍāla story, Śaṅkara-Kumārila meeting, the story of Śaṅkara's para-kāyā-praveśa and &c.) are much more natural than in Mādhava. Some stories like Śaṅkara-Vyāsa meeting are even considerably different from those in Mādhava. This naturalness, simplicity of style and narration and absence of elaboration of certain stories (vide the stories of Maṇḍana's initiation and Śaṅkar's encounter with the Kāpālika)— all point to the priority in time of Dīxit's work to that of Mādhava. Our author is, however,



equally guilty with Mādhava of narrating historically untenable stories like Śaṅkara's meeting with some king Rajaśekhara of Kerala and of his encounter with and triumph over persons like Abhinava Gupta and Nīlakaṇṭha. Otherwise, except for the omission of a couple of stories like the crocodile story and the one relating to Śaṅkara changing the course of the Cūrṇī river, the life-account is more or less the same as in the other biographies of Śaṅkara.

(a) *Ch. I* : *stt.* 82, 84 : It is to be noted that these two stanzas refer to the Jains as the opponents of Kumārila whereas in the previous stanzas, they are referred to as the Bauddhas— (stt. 28, 29 & 80) and as Saugatas (stt. 67, 71, 73 & 74). The word Saugatas applies to both the Jains and the Bauddhas. It is an interesting problem in the life of Kumārila as to who were his opponents in his crusades in his actual life. There is sufficient prima facie evidence at least that they were Jains and not the Buddhists, as is popularly and traditionally believed. It is also worthy of note that Mādhava's S. S. Jaya (i.e. Vidyāraṇya's शां° दि°) contains these two stanzas verbatim, with the words जैनाः and. जिनहस्तिषु.

(b) *Ch.I St.* 92 : The reference to Vis'iṣṭā as the wife of Śivaguru is queer. There is only one work viz., Anantā's S'. V., in some of the mss. of which only, this name is given as that of Śankara's mother. The other names, however, are in the traditional line and do not follow Anantā's version in that respect.

(c) This chapter contains three stories, viz., (1) the story of the golden Āmalakas, (2) the story of the visit of Rājaśekhara and (3) the story of the visit of the sages like Agastya. We have grouped the biographers of Śankara into two divisions, old and new, according to their possible dating. Tiru D., the author of the present work, who is, in our opinion, the earliest in the second group, has given these stories for the first time. They have been repeated later by Mādhava, (a/s Vidyāraṇya), Sadānanda, N'lakaṇṭha and Parameśvara Kavi, the second story being given by Rāja D. and G. V. K. also in addition to these four.

## ABBREVIATIONS

| | |
|---|---|
| S. S. Jaya | Saṅkṣepa Śāṅkara Jaya |
| S. V. | Saṅkara Vijaya |
| G. V. K. | Guru Vaṁsa Kāvya |
| Anantā | Anantānanda Giri |
| Tiru D. | Tirumala Dīxit |
| Rāja. D. | Rājacūdamaṇi Dīxit |

**॥ तिरुमलदीक्षितकृतः शङ्कराभ्युदयः ॥**

**( अथ प्रथमस्सर्गः । )**

शुभमस्तु। अविघ्नमस्तु।

श्रीमच्चन्द्रावतंसस्य देवस्य चरणाम्बुजम् ।
वन्दामहे जगद्वन्द्यमाश्रितानामभीष्टदम् ॥१॥
जयन्ति भगवत्पादपादपद्मरजःकणाः ।
जगन्ति यैं (र) भिध्यातैर्भजन्ति विरजस्कताम् ॥ २ ॥
जित्वा दशाननं दोष्णा धनुरालम्ब्य तस्थुष : ।
मुखं दाशरथेः स्वेदबिन्दुबिन्द.........स्महे ॥ ३ ॥
निजशिष्यजनाबोधतमस्तोमांशुमालिनः ।
(परमस्य) शिवेन्द्रस्य प्रणुमश्चरणाम्बुजम् ॥ ४ ॥
अद्वैतदर्शनाचार्यसम्प्रदायप्रसिद्धये ।
शङ्कराभ्युदयं कुर्मो गृह्णन्त्वार्या विमत्सरा: ॥ ५ ॥
क्व चास्मत्प्र (ति) भा ता (दृ) क्चारित्र्यं क्व च शाङ्करम् ।
अमृतद्युतिमादातुं पाणिभ्यां प्रयतामहे ॥ ६ ॥
स्तुतः कविभिरप्यस्मत्कृत्या तुष्यतु शङ्करः ।
पयःक्षीराब्धिवासः किं चक्रमे न व्रजे गवाम् ॥ ७ ॥
तस्यावतारलीलासु काश्चिदाचक्ष्महे वयम् ।
गणयेत्को नु रत्नानि साकल्येन महोदधे: ॥ ८ ॥
भवेदियमुपादेया कृतिर्नः शङ्करां......ता ।
अगुणा गुणयुग्ग्राह्या मुक्तायुक्तेव शुक्तिका ॥ ९ ॥
अस्ति शृङ्गदलव्द्योमस्रवद्गङ्गाजलैरिव ।
धवलः शङ्करक्रीडावासः कैलासपर्वतः ॥ १० ॥
महेशमस्तकोत्तंसशशाङ्कशकलाग्रतः ।
निर्यत्पीयूषसम्पातघनीभूत इव स्थित: ॥ ११ ॥
भाति यः शिखरासक्तधातुभेदैरलङ्कृतः ।
उद्यच्चन्द्राङ्कल्लोलपूरक्षीरोदधेरिव ॥ १२ ॥
क्रीडद्दिव्यवराराहैः का......दधित्यका ।
विद्योतिते तडित्कान्तै प्रावृट् तोयधरैरिव ॥ १३ ॥
हरमौलीन्दुनिर्भिन्नतमस्तोमदलानिव ।
यो बिभर्ति वनव्रातान् तापूछ्तरुमेचकान् ॥ १४ ॥
यः स्फुरत्यनिलोद्धूतशिखराग्रसुरद्रुमः ।
गन्धर्वकन्यकागीतं शिरोभिः श्लाघयन्निव ॥ १५ ॥
यं... तालयमत्यन्तं चुम्बन्तं गगनस्थलीम् ।
पयोधरभराश्लिष्टं कामिनो बहु मन्यते ॥ १६ ॥



येनं ग........ चामरेण प्रकाश्यते ।
मूर्ध्नि स्फुरत्पूर्णचन्द्रछत्रेण गिरिराजता ॥ १७ ॥
यस्मै स्पृहयते शैलकन्यका यास्त्रिलोचना: ।
चरणन्याससङ्क्रान्तालक्तकाङ्कितमोलये ॥ १८ ॥
यस्मादुत्पतति व्योम्नि दृष्ट्वा शारदनीरदम् ।
प्रतीपवृषभभ्रान्त्या वृषभो गिरिधन्वनः ॥ १९ ॥
यस्य बर्हिमुखग्रस्तभुजङ्गमफणच्युतैः ।
रत्नैर्निवर्तते सान्द्रा कण्टकेषु तमस्ततिः ॥ २० ॥
यस्मिन् विद्याधरीवक्त्रं मणिकुट्टिमभूषितम् ।
स्थलपङ्केरुहभ्र...........भ्रमरार्भकाः ॥ २१ ॥
यत्र मन्दाकिनीवारितरङ्गकणशीतलाः ।
हरन्त्यमरनारीणां मरुतः सुरतश्रमम् ॥ २२ ॥
वृन्दारकगणो यस्य मन्दारप्रसवं मधु ।
सुन्दरीवदनोत्तंसं कन्दरस्थो निषेवते ॥ २३ ॥
प्रत्यासन्नस्य शीतांशोर्मृगमङ्के विहारिणम् ।
आच्छिद्याऽहर्तुमिच्छन्ति यत्र सिंहकिशोरका: ॥ २४ ॥
यश्च सिंहनखोन्मुक्तमुक्ताकवचिताकृतिः ।
भाति भूभ ................ शालैरिवान्वितः ॥ २५ ॥
सुरास्तत्रैकदाऽसीनमीशानमुपतस्थिरे ।
......मिदपूर्वाद्रिशिखरस्थं चकोरका: ॥ २६ ॥
प्रसादानुमितस्वार्थसिद्धय: प्रणिपत्य तम् ।
मुकुलीकृतहस्ताब्जा विनयेन व्यजिज्ञपन् ॥ २७ ॥
विज्ञातमेव भगवन् विद्य(ते य)द्धि(ताय) नः ।
वञ्चयन्न सुरान् बु(द्ध)वपुर्धारी जनार्दनः ॥ २८ ॥
तत्प्रणीतागमालम्बैबौद्धैर्दर्शनदूषकैः ।
व्याप्तेदानीं प्रभो धात्री रात्रिः सन्तमसैरिव ॥ २९ ॥
वर्णाश्रमसमाचारान् द्विषन्ति ब्रह्मविद्विषः ।
ब्रुवन्त्याम्नायवचसां जीविकामात्रतां प्रभो ॥ ३० ॥
श्रुते विदमति[1] श्रोत्रे क्रतुरित्यक्षरद्वये ।
क्रियाः कथं प्रवर्तेरन् कथं क्रतुभुजो वयम् ॥ ३१ ॥
शिव विष्णवागमपरैर्लिङ्गचित्रादिचिह्नितैः ।
षाषण्डैः कर्म संन्यस्तं कारुण्यमिव दुर्जनः ॥ ३२ ॥
अनन्येनैव भावेन गच्छन्त्युत्तमपूरुषम् ।
श्रुतिः साध्वी मदक्षीबैः का वा शाक्तैर्न दूषिता ॥ ३३ ॥

१. पिदधति।

सद्यःकृत्तद्विजशिरः पङ्कजार्चितभैरवैः ।
मध्यस्था लोकमर्यादा का वा कापालिकाधमैः ॥ ३४॥
अन्येऽपि बहवो मार्गाः सन्ति भूमौ ससङ्कटाः ।
जनैर्येषु पदं दत्वा दुरन्तं दुःखमाप्यते ॥ ३५॥
तद्भवान् लोकरक्षार्थमुत्सार्य निखिलान् खलान् ।
वर्त्म स्थापयतु श्रौतं जगद्येन सुखं व्रजेत् ॥ ३६॥
इत्युक्त्वोपरतान् देवानुवाच गिरिजाप्रियः ।
मनोरथं पूरयिष्ये मानुष्यमवलम्ब्य वः ॥ ३७॥
यतीन्द्रः श(ङ्करो नाम्ना) भविष्यामि रसातले ।
तन्मामनुसरिष्यन्तु सर्वे त्रिदिववासिनः ॥ ३८॥
ब्रुवन्नेवं दिविषदः कटाक्षानन्यदुर्लभान् ।
कुमारे निदधौ भानुः किरणानिव पङ्कजे ॥ ३९॥
क्षीरनीरनिधेर्वीचिसचिवान् प्राप्य तान्गुहः ।
कटाक्षान्मुमुदे पश्यन् कुमुद्वानै(न्दवा)निव ॥ ४०॥
अवदन्नन्दनं स्कन्दममन्दं चन्द्रशेखरः ।
दन्तचन्द्रातपानन्दिवृन्दारकचकोरकम् ॥ ४१॥
नैगमीं कुरु मर्यादामवतीर्य महीतले ।
निर्जित्य सौगतान् सर्वानाम्नायार्थविरोधिनः ॥ ४२॥
ब्रह्मापि ते सहायार्थं मण्डनो नाम भूसुरः ।
भविष्यति सुरेन्द्रोऽपि सुधन्वा नाम भूमिपः ॥ ४३॥
तथेति प्रतिजग्राह विधेरपि विधायिनीम् ।
बुधानीकपतिर्वाणीं सुधाधारामिव प्रभोः ॥ ४४॥
अथेन्द्रो नृपतिर्भूत्वा प्रजां धर्मेण पालयन् ।
दिवं चकार पृथिवीं स्वपुरीममरावतीम् ॥ ४५॥
सर्वज्ञोऽप्यसतां शास्त्रे कृत्रिमश्रद्धयान्वितः ।
प्रतीक्षमाणः क्रौञ्चारिं मेलयामास सौगतान् ॥ ४६॥
ततः स तारकारातिरजनिष्ट महीतले ।
भट्टपादाभिधा यस्य भूषा दिक्सुदृशामभूत् ॥ ४७॥
स्फुटयन् वेदतात्पर्यमभाज्जैमिनिसूत्रितम् ।
सहस्रांशुरिवानूरुव्यञ्जितं भासयञ्जगत् ॥ ४८॥
राज्ञः सुधन्वनः प्राप नगरीं स जयन्दिशः ।
प्रत्युद्गम्य क्षित्तीन्द्रोऽपि विधिवत्तमपूजयत् ॥ ४९॥
सोऽभिनन्द्याऽशिषा भूपं मण्डलेन समन्वितम् ।
तां सभां शोभयासास सुरभिर्युवनीमिव ॥ ५०॥



सभासमीपविटपिश्रितकोकिलकूजितम् ।
श्रुत्वा जगाद तद्व्याजाद्राजानं पण्डिताग्रणीः ॥ ५१॥
मलिनैश्चेन्न सङ्गस्ते नीचैः काककुलै पिक ।
श्रुतिदूषकनिर्ह्रादैः श्लाघनीयस्तथा भवेः ॥ ५२॥
षडभिज्ञा निशम्येमां वाचं तात्पर्यगर्भिताम् ।
नितरां चरणस्पृष्टा भुजङ्गा इव चुक्रुधुः ॥ ५३॥
छित्वा युक्तिकुठारेण बुद्धसिद्धान्तशाखिनम् ।
स तद्ग्रथेन्धनैर्भिन्नैः क्रोधज्वालामवर्धयत् ॥ ५४॥
सा सभा वदनैस्तेषां रोषपाटलकान्तिभिः ।
बभौ बालातपाताम्रैः सरसीव कुशेशयैः ॥ ५५॥
उपन्यस्यत्सु साक्षेपं खण्डयत्सु परस्परम् ।
तेषूदतिष्ठन्निर्मोषा[2] भिन्दन्निव सभातलम् ॥ ५६॥
अधः पेतुर्बुधेन्द्रेण क्षताः पक्षेषु तत्क्षणम् ।
व्यूढकर्कशतर्केण तदा वितथतां गताः ॥ ५७॥
स सर्वज्ञः पदविज्ञोऽसहमान इव द्विषाम् ।
चकार चित्रविन्यस्तानेतान्मौनविभूषितान् ॥ ५८॥
ततः प्रक्षीणदर्पेषु बौद्धेषु वसुधाधिपम् ।
बोधयन् बहुधा वेदवचांसि प्रशशंस सः ॥ ५९॥
बभाषेऽथ धराधीशो विद्यायत्तौ जयाजयौ ।
यः पतित्वा गिरेः शृङ्गादप्यधस्तन्मतं ध्रुवम् ॥ ६०॥
तदाकर्ण्य मुखान्यन्ये परस्परमलोकयन् ।
द्विजाग्र्यस्तु स्मरन्वेदानारुरोह गिरेः शिरः ॥ ६१॥
यदि वेदाः प्रमाणं स्युः भूयात्काचिन्मम क्षतिः ।
इति घोषयता तस्माद्व्यपाति सुमहात्मना ॥ ६२॥
किमु दौहित्रदत्तेऽपि पुण्ये विलयमास्थिते ।
ययातिश्चन्यते[3] स्वर्गात्पुनरित्यूचिरे जनाः ॥ ६३॥
अपि लोकगुरुः शैलात्तूलपिण्ड इवापतत् ।
श्रुतिरात्मशरण्यानां व्यसनं नोच्छिनत्ति किम् ॥ ६४॥
श्रुत्वा तदद्भुतं कर्म द्विजा दिग्भ्यस्समाययुः ।
घनघोषमिवाकर्ण्य निकुञ्जेभ्यः शिखावलाः ॥ ६५॥
दृष्ट्वा तमक्षतं राजा श्रद्धां श्रुतिषु सन्दधे ।
निनिन्द बहुधाऽऽत्मानं खलसंसर्गदूषितम् ॥ ६६॥

२. निर्घोषा।
३. च्यवते।

सौगतान्यब्रुवन्नेवं[४] प्रमाणं (मत)निर्णये ।
मणिमन्त्राक्षरैरेवं देहरक्षा भवेदिति ॥ ६७ ॥
दुर्विदैरन्यथा नीते प्रत्यक्षेऽर्थेऽपि पार्थिवः ।
भ्रुकुटीभिः करमुखः सन्धामुग्रतरां व्यधात् ॥ ६८ ॥
पृच्छामि भवतः किञ्चिद्वक्तुं न प्रभवन्ति ये ।
यन्त्रोपलेषु सर्वांस्तान् घातयिष्याम्यसंशयम् ॥ ६९ ॥
इति संश्रुत्य पृथ्वीशो घटमाशीविषान्वितम् ।
आनीयात्र किमस्तीति पप्रच्छ द्विजसौगतान् ॥ ७० ॥
वक्ष्यामहे वयं भूप श्वः प्रभातेऽस्य निर्गमम् ।
इति प्रसाद्य राजानं जग्मुर्भूसुरसौगताः ॥ ७१ ॥
पद्मा इव तपस्तेपुः कण्ठद्वयसपाथसि ।
द्युमणिं प्रति भूदेवा सोऽपि प्रादुरभूत्ततः ॥ ७२ ॥
सन्दिश्य वचनीयांशमादित्येऽन्तर्हिते द्विजा ।
आजग्मुरपि निश्चित्य सौगताः कलशस्थितम् ॥ ७३ ॥
ततस्ते सौगतास्सर्वे भुजगोऽस्तीत्यवादिषुः ।
भोगीशभोगिशयनो भगवानिति भूसुराः ॥ ७४ ॥
श्रुतभूसुरवाक्यस्य वदनं पृथिवीपतेः ।
कासारशोषणम्लानसारसश्रियमाददे ॥ ७५ ॥
अथ प्रोवाच दिव्या वाक् सम्राजमशरीरिणी ।
नुदन्ती संशयं तत्र सर्वेषामपि शृण्वताम् ॥ ७६ ॥
सत्यमेव महाराज ब्राह्मणा यद्बभाषिरे ।
मा कृथास्संशयं तत्र भव सत्यव्रतिश्रवः[५] ॥ ७७ ॥
श्रुत्वाऽशरीरिणीं वाचं ददर्श वसुधाधिपः ।
मूर्तिं मधुद्विषः कुम्भसुधामिव शचीपतिः ॥ ७८ ॥
निरस्ताखिलसन्देहो विन्यस्तेतरदर्शनात् ।
आज्ञापयत्ततो राजा वधाय श्रुतिविद्विषाम् ॥ ७९ ॥
आसेतोरातुषाराद्रेर्बौद्धानावृद्धबालकम् ।
न हन्ति यः स हन्तव्यो भृत्यानित्यन्वशान्नृपः ॥ ८० ॥
इष्टोऽपि दृष्टदोषश्चेद्वध्य एव महात्मनाम् ।
जननीमपि किं साक्षान्नावधीद्भृगुनन्दनः ॥ ८१ ॥
स्कन्दानुसारिणा राजा जैना[a] धर्मद्विषो हताः ।
योगीन्द्रेणैव योगघ्ना विघ्नास्तत्त्वावलाम्बिना ॥ ८२ ॥

४. सौगतास्त्व°।
५. सत्यप्रतिश्रवः।



हतेषु तेषु दुष्टेषु परितस्तारकोविदः ।
श्रौतवर्त्मतमिस्त्रेषु नष्टेष्विव रविर्महः ॥ ८३ ॥
कुमारिलमृगेन्द्रेण हतेषु जिनहस्तिषु[a] ।
निष्प्रत्यूहमवर्धन्त श्रुतिशाखाः समन्ततः ॥ ८४ ॥
इद्धमग्निभुवा कर्मवर्त्मनि स्थापिते शिवः ।
अविद्यामग्नमुद्धर्तुं जगदैच्छत्कृपानिधिः ॥ ८५ ॥
ततो विद्याधिराजस्य केरलेषु द्विजन्मनः ।
पुत्रं शिवगुरुं नाम[६] पितरं समरोचयत् ॥ ८६ ॥
स ह्यपुत्रस्तपस्तेपे चिरशृङ्गिरिकन्दरे ।
प्रसन्नस्तपसोग्रेण प्रावोचदिदमीश्वरः ॥ ८७ ॥
परितुष्टोऽस्मि तपसा वृणीष्वायुमतस्सुतान् ।
बहून्वा सुतमेकं वा सर्वज्ञं षोडशायुषम् ॥ ८८ ॥
इत्युक्तस्स हृदालोच्य वव्रे सर्वज्ञमात्मजम् ।
तथेत्युक्त्वा गिरीशोऽपि तत्रैवान्तर्हितोऽभवत् ॥ ८९ ॥
अत्रान्तरे निष्कलङ्कशरच्चन्द्रशतोपमम् ।
आविर्बभूवान्तरिक्षात्तेजः किमपि भास्वरम् ॥ ९० ॥
परापरविदस्तस्य (तद्वि)वेश मुखाम्बुजम् ।
येनाऽलक्ष्यत तेजस्वी द्वितीय इव भास्करः ॥ ९१ ॥
ततो गर्भं ददे तस्य विशिष्टाख्या[b] स्वधर्मिणी ।
जगदाह्लादजनकं प्राचीव तुहिनद्युतिम् ॥ ९२ ॥
अमन्दानन्दनिष्यन्दचेताः शिवगुरुः स्वयम् ।
चक्रे गर्भस्य संस्कारांस्तस्याः पुंसवनादिकान् ॥ ९३ ॥
अथाऽसूत सुतं साध्वी बुधैरुत्कण्ठितोदयम् ।
लहरीव सुधापूर्णकलशं कलशोदधेः ॥ ९४ ॥
देवदुन्दुभिनिर्घोषमुखरः पुष्पवृष्टिभिः ।
कान्तस्तज्जन्मदिवसः कमप्युत्सवमादधौ ॥ ९५ ॥
मिहिरेण त्रिलोकीव मेरुणेव वसुन्धरा ।
विद्या सद्विनयेनेव व्यरुचत्तनयेन सा ॥ ९६ ॥
त्विषा प्रकाशयामास प्रसूतिभुवनं शिशुः ।
प्रदीपास्तु निशीथेऽपि पुपुषुर्दैन्यमाह्निकम् ॥ ९७ ॥
स जातकर्मणि शिशोर्द्विजाधिपनिभं मुखम् ।
प्रजातहर्षः संपश्यन्नजायत तदा कृती ॥ ९८ ॥
ऋणत्रयविमुक्तस्य कृत्यं मम धनेन किम् ।
इतीव सर्वमप्यर्थमर्थिसादकरोत्पिता ॥ ९९ ॥

६. पुत्रः शिवगुरुर्नाम।

स विग्रहेण लीलया सदुक्तिभिश्च शं यतः ।
करोत्यतोऽर्थविद्गुरुश्चकार शङ्कराह्वयम् १०० ॥
मूर्ध्नि[7] हिमकरचिह्नं निडिवे[8] नयनाङ्कमङ्कयोश्शूलम् ।
वपुषि स्फूटिकसवर्णं प्राज्ञास्तं वीक्ष्य मेनिरे शम्भुम् ॥ १०१ ॥
राज्यश्रीरिव नयकोविदस्य राज्ञो विद्येवान्वयकोविदस्य च बुधस्य ।
शुभ्रांशोश्छबिरिव शारदस्य पित्रोः सन्तोषैः सह ववृधे तदीयमूर्तिः ॥ १०२॥

॥ इति श्रीमद्भारद्वाजकुलजलधिचन्द्र श्रीतिरुमलकोण्डोपाध्यायतनय—
श्रीमत्परमशिवेन्द्रपादाब्जसेवापरायणश्रीतिरुमलदीक्षितविरचिते
शङ्कराभ्युदये महाकाव्ये प्रथमस्सर्गः ॥

**( अथ द्वितीयस्सर्गः । )**

**॥ श्रीशङ्कराय नमः ॥**

इति बालमृगाङ्कशेखरे सति बालत्वमुपागते शिवे ।
दिविषत्प्रवराः प्रजज्ञिरे भुवि षट्शास्त्रविदां सतां कुले ॥ १ ॥
कमलानिलयः कलानिधेर्विमलाख्यादजनिष्ट भूसुरात् ।
भुवि पद्मपदं वदन्ति यं सविपद्येन विवादिनां यशः ॥ २ ॥
पवनोऽप्यजनि प्रभाकरात्सवनोन्मीलितकीर्तिमण्डलात् ।
गलहस्तितभेदवाद्यको[1] किल हस्तामलकाभिधामधात् ॥ ३ ॥
पवमानसखांशतोऽजनि प्लवमानाञ्चति यद्यशोऽम्बुधौ ।
धरणी मधिता[2] विवादिवाक्सरणिर्येन स तोटकाह्वयः ॥ ४ ॥
उदभावि शिलादसूनुना मदभाग्वाधिकदम्भनिग्रहैः
न मुदं चिति कीर्तिशालिनं यमुदङ्कं ब्रुवते महीपते[3] ॥ ५ ॥
विधुरास सुरेश्वरो गिरां निधिरानन्दगिरिर्व्यजायत ।
अरुणः समभूत्(सनन्दनो)[4] वरुणोऽजायत चित्सुखाह्वयः ॥ ६ ॥
अपरेऽप्यभवन् दिवौकसः स्वपरेर्ष्यापरविद्विषः प्रभोः ।
चरणं परिसेवितुं जगच्छरणं भूसुरपुङ्गवात्मजाः ॥ ७ ॥
अमुना तनयेन भूषितं यमुनातातसमानवर्चसा ।
तुलया रहितं निजं कुला कलयामानस[5] पुत्रिणां वरः ॥ ८ ॥
उदचारयदर्भको गिरः पदचारानतनोदनन्तरम् ।
विकलोऽभवदादिमात्तयोः पिकलोकश्चरमान्मरालकः ॥ ९ ॥

७. मूर्धनि ।
८. निटले ।
१. द्यसौ ।
२. मथिता ।
३. महीतले ।
४. सनन्दनो ।
५. कुलं कलयामास स ?



कलकण्ठकुलं निषेवते दलमाम्रोदितमतदीयया ।
अधुनाऽपि भविष्णुतुल्यवाङ्मधुदोराहवसज्जया गिरा ॥ १० ॥
नवविद्रुमपल्लवास्तृतामिव काश्मीरपरागपाटलाम् ।
रचयन्नचलां पदत्विषा संचचारेन्दुनिभः शनैः शनैः ॥ ११ ॥
रजसा तमसाऽप्यनाश्रितो रजसा खेलन काल-येव[6] हि ।
स कलाधरसत्तमात्मजः सकलाश्चापि विपीरविन्दत[7] ॥ १२ ॥
सुधियोऽस्य विदिद्युतेऽधिकं विधिवच्चौलविधानसत्कृतम् ।
ललितं करुणं घृताहुतिज्वलितं तेज इवाऽशुशुक्षणेः ॥ १३ ॥
उपपादननिर्व्यपेक्षधीः स पपाठार्हतपूर्वकागमान् ।
अधिकाव्यमरंस्त कर्कशेऽप्यधिकांस्तर्कनयेऽत्यवर्तत ॥ १४ ॥
हरतस्त्रिदशेज्यचातुरीं पुरतस्तस्य न वक्तुमीश्वराः ।
प्रभवोऽपि कथासु नैजदाग्विभवोत्सारितवादिनो[8] बुधाः ॥ १५ ॥
अमुकक्रमिकोक्तिधोरणीमुरगाधीशकथावधीरिणीम् ।
मुमुहुर्निशमय्य वादिनः प्रतिवाक्योपहृता प्रमादिनः ॥ १६ ॥
कुमतानि न तेन कानि वोन्मथितानि प्रथितेन धीमताम् ।
स्वमतान्यपि तेन खण्डितान्यतियत्नैरपि साधितानि कैः ॥ १७ ॥
स विधातृवितीर्णवर्त्मनीमविधायोपनयं पिता ययौ ।
अपनीतशुगाप्तबान्धवैरुपनीतो विधिवत्ततोऽर्भकः ॥ १८ ॥
चतुरो निगमानधीतवांश्चतुरोऽप्यङ्गगणोपबृंहितान् ।
तदनु स्मृतिभारतादिकांस्तदनुष्ठानपरश्च सोऽभवत् ॥ १९ ॥
अधिसांख्यमजागरीदसौ मथितश्रौतविचारसागरः ।
फणिराट्कृतशास्त्रशीलनादणिमाद्याभिरदीप्सितसिद्धिभिः ॥ २० ॥
स हि जातु गुरोः कुले वसन् सवयोभिः सह भैक्षमाचरन् ।
भगवान् भवनं द्विजन्मनो धनहीनस्य विवेश कस्यचित् ॥ २१ ॥
तमवोचत तत्र सादरं बटुवर्यं गृहिणः कुटुम्बिनी ।
कृतिनो हि भवादृशे(षु) (ये) (व)रिवस्यां प्रतिपादयन्ति ते ॥ २२ ॥
विधिना खलु वञ्चिता वयं वितरीतुं बटवे न शक्नुमः ।
अपि भैक्षमकिञ्चनत्वतो धिगिदं जन्म निरर्थतां गतम् ॥ २३ ॥
इति दीनमुदीरयन्त्यसौ प्रददावामलकं व्रतीन्दवे ।
करुणं वचनं निशम्य सोऽप्यभवज्ज्ञाननिधिर्दयार्द्रधीः ॥ २४ ॥
स मुनिर्मुरभित्कुटुम्बिनीं पदचित्रैर्नवनीतकोमलैः ।
मधुरैरुपतस्थिवान् स्तवैर्द्विजदारिद्र्यदशानिवृत्तये ॥ २५ ॥

६. °काल एव ।
७. लिपी° ।
८. °वाग्वि ।

अथ कैटभजित्कुटुम्बिनी तडिदुद्दामनिमग्नकान्तिभिः[९]।
सकलाश्च दिशः प्रकाशयन्त्यचिरादाविरभूत्तदग्रतः ॥ २६ ॥
अभिवन्द्य सुरेन्द्रवन्दितं पदयुग्मं पुरतः कृताञ्जलिम्।
ललितस्तुतिभिः प्रहर्षिता तमुवाच स्मितपूर्वकं वचः ॥ २७ ॥
विदितं तव वत्स हृद्गतं कृतमेभिर्न पुरा भवे शुभम्।
अधुना मधुपान्तपात्रतां[१०] कथमेते महितामवाप्नुयुः ॥ २८ ॥
इति तद्वचनं स शुश्रुवान्निजगादाऽम्ब मयीदमर्पितम्।
फलमद्य ददस्व तत्फलं दयनीयो यदि तेऽहमिन्दिरे ॥ २९ ॥
अमुना वचनेन तोषिता कमला तद्भवनं समन्ततः।
कनकामलकैरपूरयज्जनताया हृदयं च विस्मयैः ॥ ३० ॥
अथ चक्रभृतो वधूमये सुकृतेऽन्तर्द्धिमुपागते सति।
प्रशशंसुरतीव शङ्करं महिमानं तमवेक्ष्य विस्मिताः ॥ ३१ ॥
अमरस्पृहणीयसम्पदं द्विजवर्यस्य निवेशमात्मवान्।
स विधाय यथापुरं गुरोः सविधे शास्त्रवराण्यशिक्षितः[११] ॥ ३२ ॥
वरमेनमवाप्य भेजिरे परभावं सकलाः कला अपि।
समवाप्य निजोचितं पतिं कमनीया इव वामलोचनाः ॥ ३३ ॥
कवि ·········कलातलता ········· परिरब्धसुकीर्तिमञ्जरी।
विलसद्गुणपल्लवाञ्चिता जगदामोदयदात्मरेणुभिः ॥ ३४ ॥
सरहस्यसमग्रशिक्षिताखिलविद्यस्य यशस्विनो वपुः।
उपमानकथाप्रसङ्गमप्यसहिष्णु श्रियमन्वपद्यत ॥ ३५ ॥
जयति स्म सरोरुहप्रभामदकुण्ठीकरणश्रियाचणम्[१२]।
द्विजराजकरोपपालितं पदयुग्मं परगर्वहारिणः ॥ ३६ ॥
जलमिन्दुमणेरिव स्रवेद्यदि पद्मोपलतस्ततः सरः।
यदि तत्र भवेत्कुशेशयं तदमुष्याङ्घ्रितुलामवाप्नुयात् ॥ ३७ ॥
धवलांशुकपल्लवावृतं विललासोरुयुगं विपश्चितः।
अमृतार्णवफेनमञ्जरीछुरितैरावतहस्तशक्तिहृत्[१३] ॥ ३८ ॥
यदि हाटकवल्लरीत्रयीघटिता स्फाटिकभूभृतस्तटित्[१४]।
स्फुटमस्य तथा कटीतटी तुलिता स्यात्कलितत्रिमेखला ॥ ३९॥

९. ०दुद्दामनिजाङ्ग०।
१०. मदपाङ्ग०।
११. °ण्यशिक्षत।
१२. °क्रिया°
१३. °शस्तभृत्।
१४. °कूटभृत्तटी।



रुचिरा तदुरःस्थली बभावररस्फालविशालमांसला।
धरणीभ्रमणोदितश्रमा[१५] पृथुशय्येव जयश्रयाश्रिता ॥ ४० ॥
प्रतिमापरिहारिणौ[१६] शुशुभाते शुभलक्षणौ भुजौ।
बहिरन्तरशत्रुनिग्रहे विजयस्तम्भयुगीधुरन्धरौ ॥ ४१ ॥
उपपीतममुष्य दिद्युते[१७] बिसतन्तुक्रियमाणसौहृदम्।
शरदिन्दुमयूखपाण्डिमातिशयोल्लङ्घनजाङ्घिकप्रभम् ॥ ४२ ॥
समराजत कण्ठशङ्खराड् भगवत्पादमुनेर्यदुद्भवः।
नि(वि)द[१८] प्रतिपक्षनिग्रहे जयशङ्खध्वनितामविन्दत् ॥ ४३ ॥
अरुणाधरसंगताऽधिकं शुशुभे तस्य हि दन्तचन्द्रिका।
नवविद्रुमपल्लरीगता[१९] तुहिनांशोरिव शारदी छविः ॥ ४४ ॥
सुकपोलतले यशस्विनः शुशुभाते सितभानुवर्चसः
वदनाश्रितभारतीकृते विधिसंकल्पितदर्पणादिव ॥ ४५ ॥
समधुव्रतपङ्कजप्रभाभुजसङ्ग्रामनिबद्धकौतुके।
श्रवणान्तगते विरेजतुर्नयने तस्य सुनीलतारके ॥ ४६ ॥
शशिनं प्रतिहृत्य...वाप्यन्मुख(ता)मित्यवधार्य पङ्कजम्।
कम्पिता किल पादताडनाद्रवमाकण्ठजले तपस्यति ॥ ४७ ॥
विललास पलाशदण्डभृत्कलितैणाजिनमात्रमेखलम्।
हिमदीधितिदीधितिप्रभं करणं तस्य कवेर्विशेषतः ॥ ४८ ॥
विमतस्मयभञ्जनानटत्पटुवाग्वादतया न केवलम्।
बुधसेव्यपदाब्जवत्तयाऽप्यमकाचार्य कथावकीरणः ॥ ४९ ॥
अमुना ऋतवः प्रसाधिताः ऋतुविभ्रेषकरस्स[२०] शङ्करः।
इयमेव भिदानयोर्जितस्मरयोस्सर्वविदोर्बुधेड्ययोः ॥ ५० ॥
कलयाऽपि तुलानुकारिणं कलयामो न वयं जगत्त्रये।
विदुषः स्वसमो यदि स्वयं भवता स्मेति वदन्ति तत्र के ॥ ५१ ॥
द्युवनान्त इवामरद्रुमा अमरद्रुष्विव पुष्पसञ्चयाः।
भ्रमरा इव पुष्पसञ्चयेऽव्वतिसङ्ख्याः किल शङ्करे गुणाः ॥ ५२ ॥
न बभूव पुरातनेषु तत्सदृशो नाऽद्यतनेषु विद्यते।
भविता किमनागतेषु वा न सुमेरोः सदृशो यथा गिरिः ॥ ५३ ॥
व्यलसत्किल तेन तत्कुलं स च शीलेन परं व्यरोचत।
अपि शीलमदीपि विद्यया ननु विद्या विनयेन विद्यते[२१] ॥ ५४ ॥

१५. ०श्रमात्।
१६. (परिघ) प्रथिमापहारिणौ।
१७. उपवीतम्।
१८. निनदः।
१९. °वल्लरी°।
२०. °विभ्रंश°
२१. दिद्युते।

सुयशःकुसुमोच्चय(ने)यद्विबुधालिर्गुणपल्लवोद्गमः।
अवबोधफलः क्षमारसः सुरशाखीव रराज सूरिराट् ॥ ५५ ॥
गणयेदपि तारका दिवि गणयेद्वा सिकतास्त्रिवर्त्मनि ।
गणयेदपि वारिधौ मणीन् गणयेत्तस्य गुणांस्तथाऽपि कः ॥ ५६ ॥
न च शेषभवी न कापिली गणिता काणभुजेन[23] गेरपि ।
फणितिष्वितरासु का कथा मुनिवाक्येषु दधत्सु चातुरीम् ॥ ५७ ॥
विबुधोन्मथितैः सुधाद्रवैर्मधुभिर्वा मधुप्रियैर्बुधः ।
तुलयेत्कथमस्य भारतं स्वरसैरिक्षुबहिष्कृतैरपि ॥ ५८ ॥
कठकाण्वमुखानिव श्रुतिः क्षितिचेदानिव चिष्मसूर्बुधान् ।
अधिगत्य विवृण्वतोऽस्य वाग्व्यरुचत्त्वाप्तभिदा सहस्रधा ॥ ५९ ॥
अपि तिर्यगधस्तथोर्ध्वमस्यामृतं वीक्ष्य दशनपरिस्फुटम्।
दधतीं द्युसरिन्निरीक्ष्य तद्गिरमब्धि न्यविशद्विलम्ब्य ताम् ॥ ६० ॥
कलशाब्धिकचाकचिक्षमं क्षणदाधीशगदागदिप्रियम् ।
[24]रजताद्रिभुजाभुजा भुजे क्रिया चतुरन्तस्य यशस्मराजिते ॥ ६१ ॥
परिशुद्धकथासु निर्जितो यशसा तस्य कृताङ्कनः शशी ।
स्वकलङ्कनिवृत्तयेऽधुनाऽप्युदधौ मज्जति सेवते शिवम् ॥ ६२ ॥
अवशीय्य यशः सस्पदामधिगन्तुं हिमदीधितिर्ध्रुवम् ।
अवगाह्य पयोधिमन्वहं कुरुते सर्वगिरिप्रदक्षिणम् ॥ ६३ ॥
द्विजराडपि तद्यशः कलानिधिनाऽप्युज्यजितोर्जिनागमे ।
वहति स्म कुरङ्गकैतवात्परिभूतेः पिशुनं स्वलाञ्छनम् ॥ ६४ ॥
कलयन्निव कीर्तिसार्ष्टितां कविराजः श्रयते सदाशिवम् ।
स निमज्जति दुग्धवारिधावपि पर्येति सदाशिवं शशी ॥ ६५ ॥
इति सप्तमहायनेऽखिलश्रुतपारङ्गततामवाप्य सः ।
परिवृत्य गुरोः कुलाद्गृहे जननीं पर्यचरन्महायशाः ॥ ६६ ॥
निशमय्य वयस्युपाष्टमे निगमान्तार्थनिरूपणक्षमम् ।
अतिवेलशमादिभिर्गुणैरतिवैय्यासिकिनारदादिकम् ॥ ६७ ॥
तमुपासितुमाययौ स्वयं समुपास्यं सुवनो गैणरपि[25] ।
नृपतिर्वसनानि भूषणान्युपधीकृत्य स राजशेखरः ॥ ६८ ॥
उपनीतमनेन किञ्चिदप्ययमैक्षिष्वथ योगिनां वरः ।
प्रणिपत्य नृपस्तु नाटकत्रयमश्रावयदात्मना कृतम् ॥ ६९ ॥
स विशेषविदा सभाजितः कविमुख्येन कलाविदां वरः ।
अगमत्कृतकृत्यधीर्निजां नगरीमस्य गुणानुदीरयन् ॥ ७० ॥

२२. °च्चयः श्रयत् ।
२३. काणभुजी न गीरपि ।
२४. रजताद्रिभुजाभुजिक्रियं चतुरं तस्य यशः स्म राजते ॥
२५. सुमनोगणै ।



[26]बहुश्रुतपारदृश्वनोः कवयोऽध्येषत शङ्करादगुरोः ।
महतः सुमहान्ति दर्शनान्यधिगन्तुं फणिराजकौशलम् ॥ ७१ ॥
निजशिष्यहृदच्च भास्वतो गुरुवश्यस्य सनन्दनादयः ।
शमपूर्वगुणैर(शि)श्रियन् कतिचिच्छिष्यगणेषु मुख्यताम् ॥ ७२ ॥
अपि सर्वकलाकलापवित्परिचर्यातिशयेन तोषयन् ।
जननीमनयत्कियन्त्यसौ दिवसानद्वजसंघमानितः[27] ॥ ७३ ॥
समयासदनं स योगिराडवगाहाय निजाम्भयार्द्धितः[28] ।
महिमातिशयादकल्पयन् महतीं तत्प्रियकाम्यया नदीम् ॥ ७४ ॥
अपि सम्प्रति केरलेषु या प्रथिताऽम्बासरिदित्युपाख्यया ।
भुवनानि पुनाति पावनैस्सलिलैस्तीरतमालशीतलैः ॥ ७५ ॥
कृतविद्यममञ्चि शीर्षैः वः श्रृतगर्हस्य मधाप्तबन्धवः[29] ।
अनुरूपगुणान(म?)चिन्तयन्ननवद्येषु कुलेषु कन्यकाम् ॥ ७६ ॥
अथ जा(तु) दिदृक्षवः क(लामवतीर्णं)··· म्मुनयः पुरद्विषम् ।
उपमन्युदधीचिगौतमत्रितुलागस्त्यमुखास्समाययुः ॥ ७७ ॥
प्रणिपत्य स भक्तिसंनत प्रसवित्र्या सह त(ता? न्विधानवत्।)··· ।
वि(धि)वन्मधुपर्कपूर्वया प्रतिजग्राह सपर्यया मुनीन् ॥ ७८ ॥
विहिताञ्जलिना विपश्चिता विनयोक्त्या[30] प्रीतविष्टरा अमी ।
ऋषयः परमार्थसंश्रया अमुना साकमचीकरन्कथाः ॥ ७९ ॥
निजगाद कथान्तरे मुनीन् जननी तस्य समस्तदर्शिनः ।
वयमद्य कृतार्थतां गता भगवन्तो यम(दु?) पागता गृहान् ॥ ८० ॥
क्व कलिर्बहुदोषभाजनं क्व च युष्मच्चरणावलोकनम् ।
तदलभ्यत चेत्पुरा कृतं सुकृतं नः किमिति प्रपञ्चये ॥ ८१ ॥
शिशुरेष किलातिशैशवे यदशेषागमपारगो भवेत्(ऽभवत्?) ।
महिमाऽपि यदद्भुतोऽस्य तद्द्वयमेतत्कुरुते कुतूहलम् ॥ ८२ ॥
करुणार्द्रदृशा सुगृह्यते स्वयमागत्य भवद्भिरप्ययम् ।
वदतास्य पुराकृतं तपः क्षममाकर्णयितुं मया यदि ॥ ८३ ॥
इति सादरमीरितां तया गिरमाकर्ण्य महर्षिसंसदि ।
प्रतिवक्तुमभिप्रचोदितो घटजन्मा प्रवयाः प्रचये[31] ॥ ८४ ॥
तनयाय पुरा पतिव्रते तव पत्या तपसा प्रसादितः ।
स्मितपूर्वमुपाददे वचो रजनीवल्लभखण्डम(ण्डनः) ॥ ८५ ॥

२६. बहवः श्रुतपारदृश्वनः ।
२७. °अद्वयसंघ° ।
२८. निजाम्बयार्थितः ।
२९. कृतविद्यममुं चिकीर्षवः श्रितगार्हस्थमथाऽप्तबन्धवः ।
३०. विनयोक्त्याऽर्पितविष्टराः ।
३१. प्रचक्रमे (last word)

वरयस्व शतायुषः सुतानपि वा सर्वविदं मितायुषम् ।
सुतमेकमितीरिते शिवे सति सर्वज्ञमयाचतात्मजम् ।। ८६ ।।
तदभीप्सितसिद्धये शिवस्तव भाग्यात्तनयो यशस्वनि ।
स्वयमेव बभूव सर्वविन्न ततोऽन्योऽस्ति यतः सुरेष्वपि ।। ८७ ।।
इति तद्वचनं निशम्य सा मुनिवर्यं पुनरप्यवोचत ।
किं(यदायुर)मुष्य भोजने[32] सकलज्ञोऽ प्यसुकम्पया वद ।। ८८ ।।
शरदः किल षोडशैव ते तनयस्यास्य तथाऽप्यसौ पुनः ।
निवसिष्यति कारणान्तराद्भुवनेऽस्मिन् दश षट् च वत्सरान् ।। ८९ ।।
इति वादिनि भाविनीं कथां ऋषिमुखेषुटजे[33] निवार्य तम् ।
ऋषयस्सह तेन शङ्करं समुपा(म)न्त्र्य ययुर्यथागतम् ।। ९० ।।c
सृणिना करिणीव सार्द्धि(र्दि?) ता शुचिना शैवलिनीव शोषिता ।
मरुता कदलीव कम्पिता मुनिवाचा सुतवत्सलाऽभवत् ।। ९१ ।।
अथ शोकप (रीतचेत) सां (नां?) द्विजराडि (त्थ) मुवाच मातरम् ।
अवगम्य च संसृतिस्थितिं किमकाण्डे परिदेवना तव ।। ९२ ।।
प्रबलानिलवेगवेल्लितध्वज (चीनांशु) ककोटिचञ्चले ।
अपि मूढमतिः कलेवरे कुरुते कः स्थिरबुद्धिमाम्बिके ।। ९३ ।।
कति नाम सुता न लालिताः कति वा नेह वधूरभुञ्जि हि ।
क्व नु ते क्व च ताः क्व वा वयं भवसङ्गः खलु पाप (न्थ?) सङ्गमः ।। ९४ ।।
भ्रमतां भववर्त्मनि भ्रमान्नहि किञ्चित्सुखमम्ब लक्षये ।
तदवाप्य चतुर्थमाश्रमं प्रयतिष्ये भवबन्धमुक्तये ।। ९५ ।।
इति कर्णकठोरभाषणश्रवणाद्बाष्पपिनद्धकण्ठया ।
द्विगुणीकृतशोकया तया जगदे गद्गदवाक्यया मुनिः ।। ९६ ।।
त्यज बुद्धिमिमां शृणुष्व मे गृहमेधी भव पुत्रमाप्नुहि ।
यज च क्रतुभिस्ततो यतिर्भवितास्यङ्ग सतामयं क्रमः ।। ९७ ।।
कथमेकतनूभवा त्वया रहिता जीवितुमुत्सहेऽबला ।
अनयैव शुचाधर्वदैणिकं[34] प्रमृतायां मयि कः करिष्यति ।। ९८ ।।
त्वमशेषविदस्यपास्य मां जरठां वत्स कथं गमिष्यसि ।
द्रवते हृदयं कथं न ते न कथंकारमुपैति वा दया ।। ९९ ।।
बहुधैवमुपेयुषीं वृथा जननीं मोहहराभिरुक्तिभिः ।
असकृत्परिसान्त्वयन्मधाग्गतशोकामवदत्तपोनिधिः ।। १०० ।।
पुरतो भविताऽस्मि तत्क्षणं तव मामम्ब यथा(दा?) स्मरिष्यसि ।
परितापममुं जहीहि मामनुजानीहि यतीन्द्रवृत्तये ।। १०१ ।।

३२. ····भो मुने सकलज्ञोऽस्यनुकम्पया·····।
३३. ····ऋषिमुख्ये घटजे·····।
३४. ····शुचौध्वदैहिकं ।



अमृषोक्तिभिरेवमादिभिः कविराश्वासितया कथं च सा ।
प्रहितः प्रणिपत्य मातरं निरगादेव ग्रहाद्विरुक्तिभिः ।। १०२ ।।
यस्य त्रिनेत्रपरिविग्रहस्य[35] का(मेन)···कनाऽस्थीयत दृक्पथेऽपि ।
तन्मूलतः संसृतिवारबन्धः[36] कथं प्रसज्येत महानुभावे ।। १०३ ।।
उरगपतिमुखादधीत्य साक्षात्स्वयम(वनेर्विवरं प्रविश्य)··· तेन ।
प्रकटितमचलाचले सयोगं जगदुपकारपरेण शब्दभाष्यम् ।। १०४ ।।
तमखिलगुणपूर्णं व्यासपुत्रस्य शि(ष्यादधिगतपरमार्थं गौड-) पादान्महर्षिः[37] ।
अधिजिगमिषुरेष ब्रह्मसंस्थान्महात्मा प्रसृमरमहिमानं प्राप गोविन्दपादम्
।। १०५ ।।

।। इति श्रीमद्भरद्वाजकुलजलधिचन्द्रतिरुमलकोण्डभट्टोपाध्यायतनय-श्री-परमशिवेन्द्रपादाब्जसेवापरायण-श्रीतिरुमलदीक्षितेन कृते शङ्कराभ्युदये महाकाव्ये द्वितीयः सर्गः ।।

## ( अथ तृतीयस्सर्गः । )

### ।। श्रीरस्तु ।।

शङ्करः सविनयैरुपचारैरभ्यतोषयदसौ गुरुमेनम् ।
ब्रह्म तद्विदितमप्युपलिप्सुस्सम्प्रदायपरिपालनबुद्ध्या ।। १ ।।
भक्तिपूर्वकृततत्परिचर्यातोषितोऽधिकतरं मुनिवर्यः ।
ब्रह्मतामुपदिदेश चतुर्भिर्वेदशेखरवचोभिरमुष्मै ।। २ ।।
सो(ऽ)धिगम्य चरमाश्रममार्यः पूर्वपुण्यनिचयैरधिगम्य ।
स्थानमर्च्यम(पि हंसपुरोगै)रुन्नतं ध्रुव इवेत्य चकाशे ।। ३ ।।
छन्नमूर्तिरतिपाटलशाटीपल्लवेन रुरुचे यतिराजः ।
वासरोपरमरक्त (पयोदाच्छादितो हिम) गिरेरिव कूटः ।। ४ ।।
एष धूर्जटिनोचोऽ थमदेभं[1] संनिहत्य रुधिराप्लुतचर्म ।
उद्यदुष्णकिरणारुणशाटीपल्लवस्य क(पटेन)बिभर्ति ।। ५ ।।
हंसभावमधिगत्य सुधीन्द्रे तं समर्चयति संसृतिमुक्त्यै ।
संचचाल कथयन्निव मेघश्रञ्चलाचपलतां वि(पये)षु ।। ६ ।।
एष नः स्पृशति निष्ठुरपादैस्तिष्ठतात्तदपि दत्तमनन्यैः ।
अस्मदीयमपि पुष्पमनैषीदित्यरोधि नलिनीपतिरब्दैः ।। ७ ।।
(वारिवा-)-हनिवहे क्षणलक्ष्यश्रीररोचत किलाचिररोचिः ।
अन्तरङ्गगतबोधकलैव[2] व्यापृतस्य विदुषो विषयेषु ।। ८ ।।

३५. त्रिनेत्रापरविग्रहस्य ।
३६. °चलातले ।
३७. °महर्षेः ।
१. धूर्जटिरबोधमहेभं ।
२. °कलेव ।

किष्णु विष्णुपदसंश्रये[3] (ब्रह्म-)तामुपदिशन्ति सुहृद्भ्यः।
यन्निशम्य शिखिनः[4] स्वनमेषां बिभ्रति स्म किल निर्भरमारान् ॥ ९॥
देवराजमपि मां न जयन्ति[5] ज्ञानग(र्वभरिता यतयोऽमी)।
इत्यमर्षवशगेन पयोदस्यन्दनेन धनुराविरकारि ॥ १० ॥
आवपुः (वुः ?) कुटजकुन्दलबाणस्पोत[6] रेणुकलिता वनवाताः।
सत्त्वराजसतमोगुणमिश्रामा(यिका)··· इव जगत्सु विलासाः ॥ ११ ॥
बभृम[7]स्तिमिरसच्छविगात्राश्चित्रकार्मुक(भृतः) स्वरघोषाः।
ध्यानयज्ञमधनाय[8] यतीनां विद्युदुज्ज्वलदशो धनदैत्याः ॥ १२ ॥
उत्ससर्ज सततं जलधारास्तोयदो गगनधाम पिधाय।
शङ्करो हृदयमात्मनि कृत्वा सञ्जहार सकलेन्द्रियवृत्तीः ॥ १३ ॥
प्राप विष्णुपदभोग(पि[9])मेघः प्रावृडागमनतो मलिनत्वम्।
विद्युदुज्ज्वलरुचाभिसृतश्चेत्को नु वंन्यपि[10] भजेन्न विकारम्[11] ॥ १४ ॥
आशये कलुषिते सलिलानां मानसोत्कहृदयाः कलहंसाः।
को(ऽ)न्यथा भवति जीवनविलुप्सुर्नाश्रये[12] भवति[13] मानसचिन्ताम् ॥१५॥
अभ्रवर्त्मनि परिभ्रमच्छं[13a]च्छुभ्रदीधितिरदभ्रपयो (धरः or दः)।
············निलयो(ऽ)पि[13b] कुश्चकास्ति मलिनाम्बरवासी ॥ १६ ॥
चातकावलिमनल्पपिपासा प्राप तृप्तिमुदकस्य चिराय।
प्राप्नुयादमृ(तमप्य)भिवाञ्छन् कालेन[14] बत घनाश्रयकारी ॥ १७॥
इत्युदीर्णजलवाहविनीतस्फीतवातपरिभूततमात्[15]।
प्रा(णभृ)त्प्रचरणप्रतिकूले नीडनिकरखगशालिनि[15a] काले ॥ १८॥

३. °श्रयतोऽब्दा।
४. निखिलाः।
५. यजन्ति।
६. °बाणास्फीत°
मायिका इव।
७. बभ्रमुः ?।
८. °मथनाय ?।
९. °भागपि।
१०. कोऽध्यवन्यपि।
११. विरागम्।
१२. जीवनलिप्सुः।
१३. भजति।
१३a. °भ्रममिच्छत्।
१३b. न प्रकाशनमवाप कलावान्।
१४. कालतो।
१५. °तमाले।
१५a. °नीलघन°



अग्रहारशतसंभृतशोभं सुग्रहाक्षतुरगस्स महात्मा।
अध्युवास तटमिन्दुभवायाः सुध्युपास्यचरणं गुरुमर्चन् ॥ १९ ॥
त्रस्तमर्त्यगणमस्तमिताशं हस्तिहस्तपृथुलोदकधाराः।
मुञ्चते स्म समुदञ्चितविद्युत्पञ्चरात्रमहिशत्रुरजस्रम् ॥ २० ॥
तीरभूरुहतलीरथ कर्षन्नग्रहारनिकरैस्सह पूरः।
आययावधिकघोषमनल्पः कल्पवार्धिलहरीव तटिन्याः ॥ २१ ॥
घोरवारिझरन(?)भीरुनराणां घोषमेष परुषं स निशम्य।
देशिकं ध्रुवसमाधिविधानं वीक्ष्य च क्षणमभूदविवक्षः ॥ २२ ॥
सोऽभिमन्त्र्य करकं त्वरमाणस्तत्प्रवाहपुरतः प्रणिधाय।
कृत्स्नमत्र समवेशयदम्भः कुम्भसम्भव इव स्वकरेऽब्धिम् ॥ २३ ॥
तन्निशम्य निखिलैरपि लोकैर्व्युद्धितो(ऽ)स्य गुरुरुक्तरुदन्तम्[15b]।
योगसिद्धिमचिरादयमापेत्यभ्यपद्यत परं परितोषम् ॥ २४ ॥
छात्रमुख्यमवदत्स कियद्भिर्वासरैर्गतघने गगने सः।
पश्य सौम्य शरदां विमलं भि(खं?) विद्ययेव विशदं परतत्त्वम् ॥ २५ ॥
वारिधा(दा?) यतिपराश्च सुपाथोधारया सदुपदेशगिरा च।
ओषधीरनुचशम्य[16] कृतार्थंकृत्य[16a] सम्प्रति हि यान्ति यथेच्छम् ॥ २६ ॥
शीतदीधितिरसौ जलभुग्भिर्मुक्तपद्धतिरतिस्फुटकान्तिः।
भाति तत्त्वविदुषामिव बोधो मायिकावरणनिर्गमशुभ्रः ॥ २७ ॥
वारिवाहनिवहे प्रतियाते भान्ति भानि शुचिभानि शुभानि।
मत्सरादिविगमे सति मैत्रीपूर्वका इव गुणाः परिशुद्धाः ॥ २८ ॥
मत्स्यकच्छपमयी धृतचक्रा गर्भवर्तिभुवनालिकाङ्क्षि[16b]।
श्रीयुताद्य तटिनी परहंसैस्सेव्यते मधुरिपोरिव मूर्तिः ॥ २९ ॥
नीरदास्सुचिरसम्भृतमेते जीवनं द्विजगणाय वितीर्य।
त्यक्तविद्युदबलाः परिशूद्धाः प्रव्रजन्ति धनवीथिगृहेभ्यः ॥ ३० ॥
चन्द्रिकाभसितचर्चितगात्रश्चन्द्रमण्डलकमण्डलुशोभि।
बन्धुजीवकुसुमोत्करशाटीसंवृतो यतिरिवायमनेहा ॥ ३१ ॥
हंससङ्गविलसद्विरजस्कं शोभवर्जितमपह्नुतपङ्कम्।
वारि सारसमतीव गभीरं तावकं मन इव प्रतिभाति ॥ ३२ ॥
शारदाम्बुधरजालपरीतं भ्राजते गगनमुज्ज्वलभानु।
लिप्तचन्दनरजस्समुदञ्चत्कौस्तुभं मुररिपोरिव वक्षः ॥ ३३ ॥

१५b. रुत्थितोऽस्य गुरुरुक्तमुदन्तम्।
१६. °रनुचराश्च।
१६a. कृतार्थी°।
१६b. नलिनाढ्या ?

पङ्कजानि समुदूढप्रभानि प्रोद्गतानि विकचानि हसन्ति ।
सोम्य योगकलयेव विपुलान्युन्मुखानि[१७] हृदयानि मुनीनाम् ।। ३४।।
रेणुभस्मकलितैर्दलशाटीसंवृतैः कुसुमलिङ्गजपमालैः ।
नूत्नकुटिल[१७a]कमण्डलुयुक्तैर्धार्यते क्षितिरुहैर्यतितौल्यम् ।। ३५ ।।
धारणादिभिरपि श्रवणाद्यैर्वार्षिकाणि दिवसान्यपनीय ।
पादपद्मरजसाद्य पुनन्तस्संचरन्ति हि जगन्ति महान्तः ।। ३६ ।।
तद्भवान्व्रजतु देव[१८] कदम्बादुद्भवां भवदवाम्बुदमालाम् ।
तत्त्वपद्धतिमभिज्ञ विवेक्तुं सत्वरं हरपुरीमिव मुक्तः[१९] ।। ३७ ।।
अत्र कृष्णमुनिना कथितं मे पुत्रक शृणु पुरा तुहिनाद्रौ ।
वृत्रशत्रुपुरदैवतजुष्टं सत्रमत्रियजमानमगच्छम् ।। ३८ ।।
संसम[२०] श्रुतिशिरोर्ध्वमुदारं[२१] शंसति स्म स पराशरसूनुः ।
इत्यपृच्छमहत्र भवन्तं तस्य वाचमुपवर्ति विनेयम् ।। ३९ ।।
आर्य वेदनिकरः प्रविभक्तो भारतं कृतमभाणि पुराणम् ।
योगशास्त्रमपि सम्यगभाषि ब्रह्मसूत्रमपि सूत्रितमासीत् ।। ४० ।।
तत्र केचिदिह विप्रतिपन्नाः कल्पयन्ति हि यथायथमर्थान् ।
अन्यथाग्रहनिवर्तकमेषां भाष्यमस्य भगवन् कर(णीयम्) ।। ४१ ।।
मद्वचस्स निशम्य सभायां विद्वदग्रसरवाचमवोचत् ।
पूर्वमेव दिविषद्भिरुदीर्णः पार्वतीपतिसदस्ययमर्थः ।। ४२ ।।
वत्सक शृणु समस्तविदेको मत्समस्तव भविष्यति शिष्यः ।
कुम्भ एव सरितः सकलं यस्सम्भविष्यति[२२] महोल्बणमम्भः ।। ४३ ।।
दुर्मतानि निहनिष्यति सो(ऽ)यं शर्मदं च करिष्यति भाष्यम् ।
कीर्तयिष्यति यशस्तव लोके कार्तिकेन्दुरणकौतुकि[२३] येन ।। ४४ ।।
इत्युदीर्य मुनिराट् स वनान्ते पत्युराप (सगिरं)[२४] गिरिजायाः ।
तन्मुखाच्छ्रुतमशेषमिदानीं सन्मुनिप्रिय मया त्वयि दृष्टम् ।। ४५ ।।
स त्वमुत्तम पुमानसि कश्चित्तत्त्ववित्प्रवर नान्यसमानः ।
तद्यतस्व निरवद्यनिबन्धैः सद्य एव जगदुद्धरणीया[२५] ।। ४६ ।।

१७. विफुल्ला° ।
१७a. वृन्तकुड्मल ।
१८. वेदकदम्ब°
१९. मविविक्ताम् ।
२०. संसदि ।
२१. शिरोर्थ° ।
२२. संहरिष्यति ।
२३. °इन्दुकर° ।
२४. सुगिरं ।
२५. जगदुद्धरणाय ।



गच्छ वत्स नगरं शशिमौलौ[२६] स्वच्छदेवतटिनीकमनीयम् ।
तावता परमनुग्रहमाद्या देवता तव करिष्यति तस्मिन् ।। ४७ ।।
एवमेनमनुशास्य दयालुः पावयन्निजदृशा विससर्ज ।
भावतः स्वचरणाम्बुजसेवामेव शश्वदपि कामयमानम् ।। ४८ ।।
पङ्कजप्रतिभटं पदयुग्मं शङ्करोऽस्य निरगादभिवाद्य ।
तद्वियोगमसहिष्णु कथंचित्तद्विलोकनमयं हृदयाब्जम्[२६a] ।। ४९ ।।
प्राप तापसवरः स हि काशीं नीपकाननपरीतसमीपाम् ।
आपगानिकटहाटकचञ्चद्यूपपङ्क्तिसमुदञ्चितशोभाम् ।। ५० ।।
संददर्श स भगीरथतप्तामन्द्रतीव्रतपसः (फल-)भूताम् ।
योगिराडुचिततीरनिकुञ्जां भोग(गि ?)भूषणजटातटभूषाम् ।। ५१ ।।
विष्णुपादनखराज्जननाद्वा शम्भुमौलिशशिसंगमनाद्वा ।
या हिमाद्रिशिखराप्ततनाद्वा स्फाटिकोपमजला प्रतिभाति ।। ५२ ।।
गायतीव कलषट्पदनादैर्नृत्यतीव पवनोच्चलिताब्जैः ।
मुञ्चतीव हसितं सितफेनैः श्लिष्यतीव चपलोर्मिकरैर्या ।। ५३ ।।
श्यामला क्वचिदपा(ङ्गम)यूखैश्चित्रता क्वचन भूषणभाभिः ।
पाटला कुचतटीगलितैर्या कुङ्कुमैः क्वचन दिव्यवधूनाम् ।। ५४ ।।
सो(ऽ)वगाह्य सलिलं सुरसिन्धोरु (त्ततार) शितिकण्ठजटाभ्यः ।
जाह्नवीसलिलवेगहृतस्तद्योगपुण्यपरिपूर्ण इवेन्दुः ।। ५५ ।।
स्वर्णदीजलकणाहितशोभा मूर्तिरस्य सुतरां विललास ।
चन्द्रपादगलदम्बुकणाङ्का पुत्रिका शशिशिलारचितेव ।। ५६ ।।
शश्वदप्युपचिता सुरसंघैर्विश्वनाथचरणावभिवन्द्य ।
कालमत्र स निनाय महान्तं भाललोचनविहारनिवेशे ।। ५७ ।।
चक्रितुल्यमहिमानमुपासांचक्रिरे तमविमुक्तनिपाकाः[२७] ।
वक्रसृत्यसुवृतामपि साध्वीमक्रतात्मधिषणां तदुपास्युः[२८] ।। ५८ ।।
पद्मनीमतिरिवांशुवितानैः पारिजातमिव पल्लवजालैः ।
वृत्रशत्रुरिव नेत्रसरोजैः छात्रपङ्क्तिभिरसौ विरराज ।। ५९ ।।
पद्मपादगिरितोटकमुख्या सद्मभूतममुमार्यगुणानाम् ।
भेजिरे श्रुतिशिरांस्यवगन्तुं रेजिरे च सुतरामितरेभ्यः ।। ६० ।।
एकदा खलु विशत्रिपुरद्विट् फलला च स हुताशनभानोः[२९] ।
विस्फुलिङ्गपदवीं दधतीषु प्रज्वलत्तपनकान्तशिलासु ।। ६१ ।।

२६. शशिमौलेः ।
२६a. °मयन्हृदयाब्जे ।
२७. तमविमुक्तनिवासाः ।
२८. वक्रसृत्यनुसृतामपि साध्वीं चक्रुरात्मधिषणां तदुपास्त्या ।।
२९. वियत्रिपुरद्विट्भाललोचनहुता° ।

दर्शयत्युरुमरीचिसरस्वत्पूरसृष्टिपटमायिनि भानौ ।
नौधनैकमणिकुट्टिममूर्च्छद्राश्नि[31]जालकशिखावलपि(च्छा) ॥ ६२ ॥
पङ्कजावभिवतीनमराले पुष्करान्तरभिगत्वरमीने ।
खाशि(शाखि ? )कोटरशयालुक कुले[32] शैलकन्दरशरण्यमयूरे ॥ ६३ ॥
शङ्करो दिवमध्यमभागे पङ्कजोत्पलपरागकषायाम् ।
जाह्नवीमभिययौ सह शिष्यैराह्निकं विधिवदेष विधित्सुः ॥ ६४ ॥
सोरित्यज[33] पथि निरीक्ष्य चतुर्भिर्भीषणैः श्वभिरनुद्रवमारात् ।
गच्छ दूरमिति तं निजगाद प्रत्युवाच स च शङ्करमेनम् ॥ ६५ ॥
(अद्वितीय)मनवद्यमसङ्गं सत्यबोधसुखरूपमखण्डम् ।
आमनन्ति शतशो निगमान्तास्तत्र भेदकलना तव चित्रम् ॥ ६६ ॥
दं····ड····पाट तगुण्डाः[34] पाटलाभवसनाः पटुवाचः ।
ज्ञानगन्धरहिता ग्रहिणो[35] हा वञ्चयन्ति किल केचन वेषैः ॥ ६७ ॥
गच्छ दूरमिति देहमुताहो देहिनं परिजिहीर्षसि विद्वन् ।
भिद्यन् मम यते मयः किं[36] साक्षिणश्च यतिपुङ्गव साक्षी ॥ ६८ ॥
ब्राह्मणश्वपचभेदविचारः प्रत्यगात्मनि कथं तव युक्तः ।
बिम्बिते त्रिपथगाम्भसि भानौ अन्तरं किमपि वास्ति सुरायाम् ॥ ६९ ॥
इत्युदीर्य वचनं विरतेऽस्मिन् सत्यपम्तदनु[37] विप्रतिपन्नम्[38] ।
अत्युदारचरितोऽन्त्यजमेनं प्रत्युवाच स च विस्मितचेताः ॥ ७० ॥
सत्यमेव भवता यदिदानीं प्रत्यपादि तमभृत्परैंतत्[39] ।
अन्त्यजोऽयमिति संप्रति बुद्धिं संत्यजामि वचसात्मविदस्ते ॥ ७१ ॥
जानते श्रुतिशिरांस्यपि सर्वे मन्वते च विजितेन्द्रियवर्गाः ।
यजते[40] हृदयमात्मनि (-नित्यं) कुर्वते न धिषणामपभेदाम् ॥ ७२ ॥
भाति यस्य तु जगद्दृढबुद्धेस्सर्वमप्यनिशमा(त्म)तयैव ।
स द्विजोऽस्तु भवतु श्वपचो वा वन्दनीय इति मे दृढनिष्ठा ॥ ७३ ॥
या चितिः कचति विष्णुमशेषापुत्रिकावधिषु सैव सदाऽहम् ।
सैव दृश्यमिति यस्य मनीषा पुल्कसो भवतु वा स गुरुर्मे ॥ ७४ ॥

३१. मूर्च्छद्रश्मि° ।
३२. शयालुशकुन्ते ।
३३. सोऽन्त्यजं ।
३४. दण्डमण्डितगुणाः धृतकुण्डाः ।
३५. गृहिणो ।
३६. भिद्यतेऽन्नमयतोऽन्नमयः किं ।
३७. सत्यवाक्तदनु ।
३८. विप्रतिपन्नः ।
३९. तनुभृत्प्रवरैंतत् ।
४०. युञ्जते ।



निद्रया रथगजादिपदेतनायया मयि चिदात्मनि विश्वम् ।
सेशमचलेन वस्त्विति विद्वानन्त्यजोऽपि गुरुवन्मम पूज्यः ॥ ७५ ॥
भाषमाण इति ते स[41] कलावानेष नैक्षत तमन्त्यजमग्रे ।
धूर्जटेस्तु समुदैक्षत मौलिस्फूर्जदैन्दवकलं सह वेदैः ॥ ७६ ॥
संभ्रमेण महता प्रणमन्तं संस्तुवन्तमथ वेदवचोभिः ।
भाष्य(बाष्प ? ) पूर्णनयनं मुनिवर्यं शङ्करः (रं?) बहुमानमुवाच ॥ ७७ ॥
अस्मदादिपदवीमभजस्त्वं शोधिता तव तपोधननिष्ठा ।
चा (बादरायण) इव त्वमपि स्याः सद्वरेण्य मदनुग्रहपात्रम् ॥ ७८ ॥
संविभज्य सकलं[42] ब्रह्मसूत्रमकरोदनुशिष्टः ।
यत्र काणभुजसांख्यपुरोगाण्यु(द्धृतानि कु.)मतानि समूलम् ॥ ७९ ॥
तत्र मूढमतयः कलिदोषाद्विन्नवेदवचनाद्दलितानि ।
भाष्यकाण्यरचयन् बहुविद्भिर्दूष्यतामुपगतानि हि केचित् ॥ ८० ॥
तद्भवान्विदितवेदशिखार्थस्तानि दुर्मतिमतानि निरस्य ।
सूत्रभाष्यमधुना विदधातु श्रुत्युपोद्बलितयुक्त्यभियुक्तम् ॥ ८१ ॥
एतदेव विबुधैरपि सेन्द्रैरर्चनीयमनवद्यमुदारम् ।
तावदेव कमलयोनिसभायामप्यवात्स्यतितरां वरिवस्याम् ॥ ८२ ॥
भास्कराभिवनगुप्तपुरोगान्नीलकण्ठगुरुमण्डनमुख्यान् ।
पण्डितानथ विजित्य धरायां ख्यापयाद्वयमते परतत्त्वम् ॥ ८३ ॥
मोहसंतमसवासरनाथांस्तत्रेति[43] विनिवेश्य विनेयान् ।
पालनाय परतत्त्वसरण्या मामुपैष्यसि ततः कृतकृत्यः ॥ ८४ ॥
एवमेनमनुगृह्य कृपावानागमैः सह शिवोऽन्तरधत्त ।
विस्मितेन मनसा सह शिष्यैः शङ्करोऽपि सुरसिन्धुमयासीत् ॥ ८५ ॥
सोऽवगाह्य विधिमाह्निकमार्यः संविचिन्त्य गुरुपादसरोजम् ।
सप्तभिर्नवभिरप्यथ षड्भिर्वासरैररचयत्किल भाष्यम् ॥ ८६ ॥
व्याकरोच्छ्रुतिशिरांस्यथ विद्वान्निःसृता हरिमुखादर्पिताः ।
सङ्ग्रहप्रकरणान्यपि तेषां संन्यधात्तनुमतीननुगृह्णन् ॥ ८७ ॥
पुष्यदात्मपरमात्मविचारं शिष्यकल्मषनिबर्हणमार्यः ।
व्याचकार हरिनामसहस्रं रोचमानपदवाक्यनिबन्धम् ॥ ८८ ॥
न्यायमन्धरविभन्धरजाता[44] भाष्यनूतनसुधा श्रुतिसिन्धोः ।
केवलं क्रमणतो विबुधेभ्यश्चित्रमत्र वितरत्यमृतत्वम् ॥ ८९ ॥
भाष्यमेष समपाठयदन्याः स्वाः कृतीश्च यतिराड्····मुक्ते ।
तत्र साधनचतुष्टययुक्तान् ब्राह्मणान् बहुगुणानुपपन्नान् ॥ ९० ॥

४१. तेन ।
४२. सकलं श्रुतिजालं···· ।
४३. तत्र तत्र ।
४४. न्यायमन्दरविमन्थनजाता ? ।

एकदा द्युसरितं प्रति शाटीशालनाय गिरिनामनि याते ।
भक्तवत्सलतनू तदपेको[४५] व्याकृतौ यतिपतिर्विललम्बे ॥ ९१ ॥
शान्तिमथ[४६] कर्तुमसंज्यषूद्यतेषु[४७] स विनेयवरेषु ।
स्थीयता गिरिरपेक्षणमात्रा वेष्यतीति समुदीनयति स्म[४८] ॥ ९२ ॥
तां निशम्य निगमान्तगुरूक्तिं मन्दधीरनधिकार्यपि शास्त्रे ।
किं प्रतीक्ष्यत इति स्म ह भित्तिः पद्मपादमुनिना समदर्शि ॥ ९३ ॥
तस्य गर्वमपहर्तुमखर्वं स्वाश्रयेषु करुणातिशयाच्च ।
व्यादिदेश स चतुर्दशविद्याः सद्य एव मनसा गिरिनाम्ने ॥ ९४ ॥
सोऽधिगत्य तदनुग्रहमुच्चैस्तत्क्षणेन विदिताखिलविद्यः ।
इष्टदेशिकपरम्परतत्त्वव्य[४९]ञ्जकैर्ललिततोटकवृत्तैः ॥ ९५ ॥
नूतनामृतसतीर्थ्यमुदारं गोस्तनीमधुरिमातिशयध्वम् ।
वाक्यगुम्फमवगत्य तदीयं विस्मिताः स्मयमुपास्यतु[५०] सर्वे ॥ ९६ ॥
तोटकाह्वयमवाप्य महर्षिः[५१] ख्यातिमाप स दिशासु तदादि ।
पद्मपादसदृशप्रतिभावान्मुख्यशिष्यपदवीमपि लभ्ये(लेभे)?)॥ ९७ ॥
पारयन्तमिति[५२] वैदिकविद्यां केचिदेनमविमुक्तनिवासाः ।
आक्षिपन् कुमतपाशुपतस्थाः प्रोद्यदुज्ज्वलयशोजनितेर्ष्याः ॥ ९८ ॥
तद्वितलनमनल्पमनीषा[५३] श्रुत्युदाहरणतः स निरस्य ।
ईषदस्तमितगर्वभराणामागमानपि ममन्द[५४] परेषाम् ॥ ९९ ॥
अद्वितीयनिरते सति वेदे[५५] मुक्तिरीशसमतैव कथं स्यात् ।
ध्यानजा किमिति सा न विनश्येद्भावकार्यमखिलं हि न नित्यम् ॥ १०० ॥
किञ्च संक्रमणमीशगुणानामिष्यते पशुषु मोक्षदशायाम् ।
तन्न साध्ववयवैर्विधूणां[५६] संक्रमो न घटते विधुराणाम् ॥ १०१ ॥
पद्मगन्ध इव गन्धकहेऽस्मिन्नात्मनि श्वगुरुणोऽस्त्विति चेन्न[५७] ।
तत्र गन्धसमवायि नभस्वत्संयुतं दिशति गन्धधियं तत् ॥ १०२ ॥

४५. तदपेक्षो ।
४६. शान्तिपाठमत ।
४७. असंख्येषू°
४८. स्थीयतां गिरिरपि क्षणमात्रादेष्यतीति समुदीरयति स्म ।
४९. ऐष्ट देशिकवरं परतत्त्वव्यञ्जकैः ।
५०. स्मयमुपासत ।
५१. महर्षेः ।
५२. पाठयन्त ।
५३. तद्विकल्पनमनल्प° ।
५४. ममन्थ ।
५५. अद्वितीयनिरता सति भेदे ।
५६. विधुराणां ।
५७. आत्मनीश्वरगुणो° ।



किन्त्वेकदेशेन समाश्रयन्ते कात्स्न्येन वा शम्भुगुणा विमुक्तान् ।
पूर्वे तु पूर्वोदितदोषसङ्गस्त्वन्तेऽज्ञतादिः परमेश्वरे स्यात् ॥ १० ॥
इत्थं तर्कैः कुलिशकठिनैः पण्डितंमन्यमानाः ।
भिद्यत्स्वार्थाः स्मयभग(र?)मदं तत्यजुस्तन्त्रिकास्ते ।
पक्षाघातैरिव रयघनैस्ताड्यमानाः फणासु ।
क्ष्वेडज्वालं खगकुलपतेः पन्नगाः साभिमानाः ॥ १०४ ॥
व्याख्याजृम्भितपाटसे[५८] फणिपतेर्मन्दाक्षमुद्दीपयन् ।
संख्यालभ्योऽथ[५९] शिष्यहृद्वनरुहेष्वादित्यतामुद्वहन् ।
उद्वेलस्वयशःसुमैस्स भगवत्पादो जगद्भूषयन् ।
कुर्वन् वादिमृगेषु निर्भरमगाच्छार्दूलविक्रीडितम् ॥ १०५ ॥

॥ इति श्रीमद्भरद्वाजकुलजलधिचन्द्रश्रीतिरुमलकोण्डुभट्टोपाध्यायतनयश्रीमत्परम-शिवेन्द्रपादाब्जसेवापरायणश्रीतिरुमलदीक्षितेन विरचिते शङ्कराभ्युदये महाकाव्ये तृतीयः सर्गः ॥

## ( अथ चतुर्थस्सर्गः । )

**॥ शुभमस्तु ॥**

ततः कदाचित्त्रिदशापगायास्तीरे यतिक्ष्मापतिरानतेभ्यः ।
अध्यापयन् भाष्यमसावदूरादालोकयत्सत्यवतीतनूजम् ॥ १ ॥
जटास्तडिद्वल्लितमल्लिका श्रीविवादगोष्ठीमुखरांशुपूराः ।
दधानमम्भो धरकान्त्यखर्वगर्वग्रहोच्चाटनमान्त्रिकाभम् ॥ २ ॥
अखण्डशुभ्रच्छविमण्डलत्वपाण्डित्यवैतण्डिकमुद्वहन्तम् ।
कमण्डलुं चांगरुचं स्वनैल्यसंपत्समाकर्षणसिद्धविद्याम् ॥ ३ ॥
शार्दूलचर्मोद्वहनेन भूतेरुद्धूलनेनापि जटाच्छटाभिः ।
रुद्राक्षमालावलनेन शम्भोरर्धासनाध्यासनसख्यपात्रम् ॥ ४ ॥
स्फुरद्वपुः कान्तिकलिन्दकन्यां झरित्रिमार्गायितयज्ञसूत्रम् ।
मुखारविन्दोद्यतदन्तकान्तिविहस्यमानामृतधामभानुम् ॥ ५ ॥
अद्वैतविद्याङ्कुशतीक्ष्णधारावशीकृताहंकृतिकुञ्जरेन्द्रम् ।
स्वशास्त्रतन्तूज्ज्वलसूत्रदामनियन्त्रिताकृत्रिमगोसहस्रम् ॥ ६ ॥
तत्तादृगत्युज्ज्वलकीर्तिशालिशिष्यालिसंशोभितपार्श्वभागम् ।
कटाक्षवीक्षामृतवर्षधारा निवारिताशेषजनानुतापम् ॥ ७ ॥
विलोक्य वाचंयमसार्वभौमं स शङ्करोऽशङ्कितदर्शनं तम् ।
गुरुं गुरूणामपि हृष्टचेताः प्रत्युद्ययौ शिष्यगणैस्समेतः ॥ ८ ॥
ततोऽर्चितस्तेन यथाविधानमासेदिवान्विष्टरमात्मनिष्ठः ।
द्वैपायनः प्रश्रयनम्रपूर्वकायं यतीशानमिदं बभाषे ॥ ९ ॥

५८. °पाटवात् ।
५९. संख्यालङ्घित° ।

कश्चिद्गुरोस्ते[1] कुशलं महर्षेः कश्चित्त्वया[1] सम्यगुपासितोऽयम् ।
कश्चित्त्वमेनेन[1] मुनेऽनुशिष्टो जानासि तात्पर्यमनादिवाचाम् ॥ १० ॥
कृतं त्वया भाष्यमितीन्दुमौलेः सभांकर्णेसिद्धमुखां[2] निशम्य ।
हृदा प्रहृष्टेन दिदृक्षयाऽहं विद्वन्नभूवं तव दृक्पथेऽद्य ॥ ११ ॥
व्याख्याय संख्यैः कविभिः पुरैतद्व्याख्यास्यते कैश्चिदितः परं च ।
भवानिवास्मद्धृदयं किमेते सर्वज्ञ विज्ञातुमलं निगूढम् ॥ १२ ॥
प्रसन्नगम्भीरभवत्प्रणीतप्रबन्धसन्दर्भभवः प्रहर्षः ।
प्रोत्साहयत्यात्मविदामृषीणां वरेण्य विश्राणयितुं वरं ते ॥ १३ ॥
पुरा पुरारातिवरात्किलायुस्समास्समान्यस्तव षोडशैव ।
अद्यानवद्यास्मदनुग्रहेण भूयोऽपि भूयात्तव षोडशायुः ॥ १४ ॥
त्वमायुषाऽनेन विरोधिवादिगर्वाङ्कुरोन्मूलनजागरूकैः ।
वाक्यैः कुरुष्वोज्झितभेदबुद्धिरद्वैतविद्यापरिपन्थिनोऽन्यान् ॥ १५ ॥
तमेवमुक्त्वा तपसां स राशिर्द्वैपायनोऽन्तर्धिमधत्त सद्यः ।
यतिक्षितीशोऽपि गुरोर्नियोगान्मनो दधे दिग्विजये मनीषी ॥ १६ ॥
ततः स वेदान्तरहस्यवेत्ता छेत्ता मतानां तदसंमतानाम् ।
प्रयागमागात्प्रथमं जिगीषुः कुमारिलं साधितकर्मजालम् ॥ १७ ॥
तत्र त्रिवेणीमवगाह्य वातैः कह्लारशीतैरुपसेव्यमानः ।
तीरे विशश्राम तमालशालिन्यत्रान्तरेऽश्रूयत लोकवार्ता ॥ १८ ॥
सोऽयं गुरोरुन्मथनप्रसक्तं महत्तरं दोषमपाकरिष्णुः ।
अशेषवेदार्थविदास्तिकत्वात्तुषानलं प्राविशदेव धीरः ॥ १९ ॥
अयं ह्यधीताखिलवेदमन्त्रः कूलंकषालोडितसर्वतन्त्रः ।
नितान्तदूरीकृतदुष्टतन्त्रस्त्रैलोक्यविश्रामितकीर्तियन्त्रः ॥ २० ॥
श्रुत्वेति तां सत्वरमेष गच्छन्व्यलोकयत्तं तुषराशिसंस्थम् ।
प्रभाकराद्यैः प्रथितप्रभावैरुपस्थितं साधुमुखैर्विनेयैः ॥ २१ ॥
धूमायमानेन तुषानलेन सन्दह्यमानोऽपि वपुष्यदीनम् ।
संदृश्यमानेन मुखेन बाष्पपरीतपद्मश्रियमादधानम् ॥ २२ ॥
स शुश्रुवांस्तन्महिमानमुच्चैः कुमारिलोऽशक्ततयात्मनः स्वैः ।
शिष्यैः सपर्यामथ कारयित्वा स्वान्तेन शान्तेन बभाष वाणीम् ॥ २३ ॥
नमोऽस्तु ते ब्रह्मविदग्रयायी न लंभिते(?) दर्शनमद्य दैवात् ।
धन्यो मदन्यो न जगत्त्रयेऽस्ति भाग्यानि मेऽद्यैव पचेलिमानि ॥ २४ ॥
अहं हि बौद्धादधिगत्य विद्यामघातयं तत्कुलमेव पूर्वम् ।
जैमिन्युपज्ञेऽभिनिविष्टचेताः शास्त्रे निरास्तं परमेश्वरं च ॥ २५ ॥

१. कच्चित् ?
२. °मुखान्निशम्य ।



दोषद्वयस्यास्य चिकीर्षुरर्हन् यथोदितां निष्कृतिमाश्रयाशम् ।
प्राविक्षमेषा पुनरुक्तभूता जाता भवत्पादनिरीक्षणेन ॥ २६ ॥
भाष्यं प्रणीतं भवतेति योगिन्नाकर्ण्य तत्रा विविदाय वृत्ताम्[1] ।
यशोऽधिगच्छेयमिति स्म वाचां[2] स्थिता पुरा संप्रति किं तदुक्त्या ॥ २७ ॥
इत्युक्तवाक्यं तमभाषतैव व्याख्याहि मध्येवमुदारबुद्धे ।
उज्जीवयिष्याम्यधुनैव सम्यक्कमण्डलुस्थाम्बुकणोक्षणेन ॥ २८ ॥
इत्यूचिवांसं विबुधावतंसं स धर्मविद्ब्रह्मविदां वरेण्यम् ।
विद्याधनः शान्तिधनाग्रगण्यं सप्रश्रयं वाचमुवाच भूयः ॥ २९ ॥
जाने तवाहं भगवन्प्रभावं संहृत्य भूतानि पुनर्यथावत् ।
स्रष्टुं समर्थोऽसि तथाविधो मामुज्जीवयेश्चेदिह किं विचित्रम् ॥ ३० ॥
नाभ्युत्सहे किन्तु यतिक्षितीन्द्र संकल्पितं हातुमिदं व्रताग्र्यम् ।
तत्तारकं देशिकवर्य मह्यमादिश्य तद्ब्रह्म कृतार्थयोद्धतीः[4] ॥ ३१ ॥
अयं च पन्था यदि ते प्रकाश्यः सुधीश्वरो मण्डनमिश्रशर्मा ।
दिगन्तविश्रान्तयशा विजेयो यस्मिन्जिते सर्वमिदं जितं स्यात् ॥ ३२ ॥
निर्व्याजिकारुण्यनिध मुहूर्तमत्र त्वया भाव्यमहं तु यावत् ।
योगीन्द्रहृत्पङ्कजभाव्यमेत[5]त्यजाम्यनूपम (म) वेक्षमाणः[6] ॥ ३३ ॥
अथोपसंहृत्य वचांसि तेन प्रकाशितात्मा यतिपुङ्गवेन ।
सद्योऽवधूताखिलकर्मबन्धो विदेहकैवल्यमसौ प्रपेदे ॥ ३४ ॥
ततो यतीशः स्ववशे विधातुं यशोनिधिं मण्डनमिश्रमाशु ।
शिष्यैश्चतुर्भिः स वियत्पथेन माहिष्मतीं नाम पुरीं प्रतस्थे ॥ ३५ ॥
तारसुतोरणमौक्ति(क)तोरणाङ्कां सीमन्तिनीवक्त्रलसन्मृगाङ्काम् ।
बुधाभियुक्ताङ्कमिसम्भृताङ्कां व्योमाश्रयामादधती विशङ्काम् ॥ ३६ ॥
श्रिया पराभूतविमानलीलां नक्षत्रवीथीनिभवीदिजालाम् ।
वधूजनाधिष्ठितचन्द्रशालां विचित्ररत्नोज्ज्वलहर्म्यमालाम् ॥ ३७ ॥
कूजद्विहंगाकुलकाननान्तां विचित्रमाणिक्यलसन्निशान्ताम् ।
प्रासादकूटच्छुरितेन्दुकान्तां सौवर्णचैत्योज्ज्वलचत्वरान्ताम् ॥ ३८ ॥
तस्यां सहस्त्राक्षनिकेतनाभं स्फुरन्मरुच्चञ्चलकेतनाभम् ।
विलोकयामास स मण्डनस्य निवेशनं भूतलमण्डलस्य ॥ ३९ ॥
सौधाग्रसंच्छन्ननभोवकाशं प्रविश्य तत्प्राप्य कवेः सकाशम् ।
विद्या अशेषान्तयशः प्रकाशं[7] ददर्श तं पद्मजसंनिकाशम् ॥ ४० ॥

३. तत्रापि विधाय वृत्तिम् ।
४. कृतार्थयेथाः ।
५. °पङ्कजभाग्य° ।
६. त्यजाम्यसून्रूपमवेक्षमाणः ।
७. विद्यावशेषात्तायशःप्रकाशः ।

तपोमहिम्नैव तपोनिधानं स जैमिनिं सत्यवतीतनूजम् ।
यथाविधि श्राद्धविधौ निमन्त्र्य तत्पादपद्मान्यवनेजयन्तम् ॥ ४१ ॥
तत्रान्तरिक्षादवतीर्य योगिवर्यस्समागम्य यथार्हमेषः ।
द्वैपायनं जैमिनिमप्युभाभ्यां ताभ्यां सहर्षं प्रतिसन्धितोऽभूत् ॥ ४२ ॥
निरीक्ष्य नक्षत्रपथावतीर्णं ससंभ्रमं मण्डनपण्डितोऽसौ ।
व्यासाज्ञया शास्त्रवदर्चयित्वा न्यमन्त्रयद्वैक्ष्यकृते महर्षिम् ॥ ४३ ॥
स चाब्रवीत्सोम्य विवादभिक्षामिच्छन्भवत्संनिधिमागतोऽस्मि ।
प्रयच्छ विद्वन् यदि शक्तिरस्ति न चेज्जितोऽस्मीति वचोऽभिदध्याः ॥ ४४ ॥
अद्यातिधन्योऽस्मि यदार्यपादो मया सहाभ्यर्थयते विवादम् ।
भविष्यति[8] वादकथा परेद्युः माध्याह्निकं संप्रति कर्म कुर्याम् ॥ ४५ ॥
तस्मिन्गृहीतात्मवचस्युदारबुधिर्यथावद्विहितं समाप्य ।
तत्संनिधावेव विवादमैच्छत्कर्तुं यतीशेन सह द्विजेन्द्रः ॥ ४६ ॥
विधाय भार्यां विदुषीं सदस्यां विधीयतां वादकथा सुधीन्द्र ।
इत्थं समाभाष्य तदाशयज्ञावन्तर्दधाते मुनिसत्तमौ तौ ॥ ४७ ॥
ततः समादिश्य सदस्यतायां सधर्मिणीं धर्मकृतां वरिष्ठः ।
स शारदां नाम समस्तविद्याविशारदां वादसमुत्सुकोऽभूत् ॥ ४८ ॥
पत्या नियुक्ता पतिदेवता सा सदस्यभावे सुदती चकाशे ।
तयोर्विवेक्तुं श्रुततारतम्यं समागता संसदि भारतीव ॥ ४९ ॥
ततस्तयोरास महान्विवादः सदस्यविश्राणितसाधुवादः ।
स्वपक्षसाक्षीकृतसर्ववेदः परस्परस्यापि कृतप्रमोदः ॥ ५० ॥
दिने दिने चाधिगतप्रकर्षः भूरीभवत्पण्डितसंनिकर्षः ।
अन्योन्यभङ्गाहिततीव्रतर्षस्तथापि दूरीकृतजन्यमर्षः ॥ ५१ ॥
एवं स षट्त्रिंशदहानि जल्पः परस्पराभाषितसद्विकल्पः ।
प्रज्ञाविशेषोहितभूरिकल्पो बभूव रात्रंदिवमप्यनल्पः ॥ ५२ ॥
ततो यतिक्ष्माभृदवेक्ष्य दाक्ष्यं क्षोदक्षमं तस्य विचक्षणस्य ।
चिक्षेप विक्षोभितसर्वपक्षं विद्वत्समक्षाप्रतिभातकक्ष्यम् ॥ ५३ ॥
ततः स्वसिद्धान्तसमर्थनाय प्रागल्भ्यहीनोऽपि स सभ्यमुख्यः ।
जगाद वेदान्तवचः प्रसिद्धमद्वैतसिद्धान्तमपाकरिष्णुः ॥ ५४ ॥
भो भो यतिक्ष्माधिपते भवद्भिर्जीवेशयोर्वास्तवमैकरूप्यम् ।
विशुद्धमङ्गीक्रियते हि तत्र प्रमाणमीषन्न वयं प्रतीमः ॥ ५५ ॥
स प्रत्यवादीदिदमेव मानं यच्छ्वेतकेतुप्रमुखान्विनेयान् ।
उद्दालकाद्या गुरवो महान्तः संग्राहयन्त्यात्मतया परेशम् ॥ ५६ ॥
वेदावसानेषु हि तत्त्वमादिवचांसि जप्तान्यघमर्षणानि ।
हुंफण्मुखानीव वचांसि योगिन्नेषां विवक्षास्ति कुहस्विदर्थे ॥ ५७ ॥

८. भविष्यते ।



अर्थाप्रतीतौ किल हुंफडादेर्जपोपयोगित्वमभाणि विज्ञैः
अर्थप्रतीतौ स्फुटमत्र सत्यां कथं भवत्प्राज्ञ जपार्थतैव ॥ ५८ ॥
आपाततस्तत्त्वमसीतिवाक्याद्यतीश जीवेश्वरयोरभेदः ।
प्रतीयतेऽथापि मखादिकर्तृप्रशंसया स्याद्विधिशेष एव ॥ ५९ ॥
ऋत्वङ्गया(यू?) पादिकमर्यमादिदेवात्मना वाक्यगणः प्रशंसन् ।
शेषः क्रियाकाण्डगतो यदि स्यात्काण्डान्तरस्थोऽपि भवेत्कथं सः ॥ ६० ॥
तर्ह्यस्तु जीवे परमात्मदृष्टिविधायकं कर्मसमृद्धयेह[9] ।
अब्रह्मणि ब्रह्मधियं विधत्ते मनोन्नार्कनभस्वदादौ ॥ ६१ ॥
संश्रूयतेऽन्यत्र यथा लिङ्गादिर्विभावको ब्रह्मविभावनायाः ।
तथाविधेरश्रवणान्न······पान्[10] संजाधएन्यत्र[11] कथं विधानम् ॥ ६२ ॥
यद्वत्प्रतिष्ठाफलदर्शनेन विधिर्यतीनां वर रात्रिसत्रे ।
प्रकल्प्यते तद्वदिहापि मुक्तिफलश्रुतेः कल्पयितुं स युक्तः ॥ ६३ ॥
तर्हि क्रियाजन्यतया विमुक्तिः स्वर्गादिवद्धन्त विनश्वरा स्यात् ।
उपासना कर्तुमकर्तुमन्यथाकर्तुमहार्ही[12] मनसः क्रियैव ॥ ६४ ॥
मा भूदिदं तत्त्वमसीतिवाक्यमुपानसी[13] पर्यवसायि कामम् ।
किन्त्वस्य जीवस्य परेण साम्यप्रत्यायजं सत्तमजो भवीतु[14] ॥ ६५ ॥
किं चेतनत्वेन विभक्तिसाम्यं[15] सार्वज्ञ्यसार्वात्म्यमुखैर्गुणैर्वा ।
आद्ये प्रसिद्धं खिल चापदेश्यमन्ते[16] स्वसिद्धान्तविरुद्धता स्यात् ॥ ६६ ॥
नित्यत्वमात्रेण मुने परात्मगुणोपमानैः सुखिबोधपूर्वैः ।
गुणैरविद्यादृतिप्रतीतै[17] साम्यं ब्रवीत्यस्य ततो न दोषः ॥ ६७ ॥
यद्येवमेतस्य परत्वमेव प्रत्याययत्वत्र दुराग्रहः कः ।
त्वयैव तस्य प्रतिभासशङ्का विद्वन्नविद्यावरणान्निरस्ता ॥ ६८ ॥
भो चेतने त्वेन[18] शरीरिसाम्यमावेद्यतामस्य जगत्प्रसूतेः ।
सतोऽर्थतस्तेन परोदितस्याप्यणुप्रधानप्रभृतेर्निरासः ॥ ६९ ॥
हन्त्वेवमस्तीति तदा प्रयोगः स्यात्सन्मते तत्त्वमसीति न स्यात् ।
तदैक्षतेत्यत्र जडत्वशङ्का निवर्तनादत्र पुनर्न चोद्यम् ॥ ७० ॥

९. समृद्धयेऽर्हन् ।
१०. °श्रवणान्मनीषिन् ।
११. जंजाघटीत्यत्र ।
१२. °अन्यथाकर्तुमथार्हा ।
१३. °वाक्यमुपासना° ।
१४. साम्यप्रत्यायकं सत्तम बोभवीतु ।
१५. विवक्ति साम्यं ।
१६. नोपदेश्य° ।
१७. °अविद्यावृतितोऽप्रतीतै ।
१८. चेतनत्वेन ।

नन्वेवमप्यैकपरत्वमस्य प्रत्यक्षपूर्वप्रमितिप्रकोपात् ।
न युज्यते तज्जपमात्रयोगे स्वाध्यायविद्याश्रितमभ्युपेयम् ॥ ७१ ॥
अक्षेण चेद्भेदमितिस्तदा स्यादभेदवादश्रुतिवाक्यबाधः ।
असन्निकर्षान्न भवेद्धि भेदप्रमैव तेनास्य कुतो विरोधः ॥ ७२ ॥
भिन्नोहमीशादिति भासते हि भेदस्य जीवात्मविशेषणत्वम् ।
तत्संनिकर्षेस्त्वदसंप्रयोगान् भावेऽपि[19] भेदेन्द्रिययोर्मनीषिन् ॥ ७३ ॥
अतिप्रसक्तेर्ननु केवलस्य विशेषणत्वस्य तदभ्युपेयम् ।
भेदाश्रये हीन्द्रियसंनिकृष्टे स[20] संनिकृष्टत्वमिहात्मनोऽस्ति ॥ ७४ ॥
भेदाश्रयात्मेन्द्रियसंनिकर्षो नेत्युक्तमेतच्चतुरं न यस्मात् ।
चित्तात्मनोर्द्रव्यतया द्वयोरप्यस्त्येव संयोगसमाश्रयत्वम् ॥ ७५ ॥
आत्मा विभुः स्यादथवाऽणुमात्रः संयोगिता नोभयथाऽपि युक्ता ।
दृष्टा हि सा सावयवस्य लोके संयोगिता सावयवेन् विद्वन् ॥ ७६ ॥
मनोऽक्षमित्यस्युपगम्य भेदा सोऽङ्गत्यमुक्तं[21] परमार्थतस्तु ।
साहाय्यकृल्लोचनपूर्वकस्य पीपादिवन्नेन्द्रियमेव चित्तम् ॥ ७७ ॥
भेदाप्रमानिन्द्रियजास्तु[22] तर्हि साक्षिस्वरूपैव तथापि योगिन् ।
तया विरोधात्परमात्मजीवभेदं कथं बोधयतु प्रमाणम् ॥ ७८ ॥
प्रत्यक्षमात्मेश्वरयोरविद्यामाया(युजो)र्बोधयति प्रभेदम् ।
श्रुतिस्तयोः केवलयोरभेदं भिन्नाश्रयं[23] तन्मतयोर्विरोधः ॥ ७९ ॥
स्याद्वो[23] विरोधस्तदपि प्रवृत्तं प्रत्यक्षमग्रे बलमेव बाध्यम् ।
प्राबल्यवत्या चरमप्रवृत्त्या श्रुत्याह्यप्रच्छेदनयोक्तरीत्या[24] ॥ ८० ॥
नन्वेवमप्यस्त्यनुमानबाधो भेदश्रुतेः संयमिचक्रवर्तिन् ।
घटादिवद्ब्रह्मनिरूपितेन भेदेन युक्तोऽयमसर्ववित्त्वात् ॥ ८१ ॥
किमेष भूतः[25] परमार्थभूतः प्रसाध्यते काल्पनिकोऽथवाऽऽद्ये ।
दृष्टान्तहीनश्चरमे[26] तु विद्वान्मारीकृस्थाभिरपाथनिय्यः[27] ॥ ८२ ॥
स्वप्रत्ययाबाध्यभिदाश्रयत्वं साध्यं घटादौ च तदस्ति योगिन् ।
त्वयाऽऽत्मबोधे न भिधा न भाध्येत्यनभ्युपेतेति[28]न कोऽपि दोषः ॥ ८३ ॥

१९. तत्संनिकर्षोऽस्त्वथ संप्रयोगाभावेऽपि ।
२०. न संनिकृष्टत्व° ।
२१. भेदासङ्गित्वमुक्तं ।
२२. भेदप्रमा नेन्द्रियजास्तु ।
२३. भिन्नाश्रयत्वान्न तयोर्विरोधः ।
२३. स्याद्वा ।
२४. श्रुत्या ह्यपच्छेदनयो° ।
२५. भेदः ।
२६. दृष्टान्तहानिः ।
२७. विद्वन्नूरीकृतोऽस्माभिरसाधनीयः ।
२८. त्वयाऽऽत्मबोधेन भिदा न बाध्ये° ।



ननु स्वशब्देन सुखादिमान्वा विवक्षितस्तद्विदुरोऽथवाऽऽत्मा[29] ।
आद्येऽस्मदिष्टं ननु साध्यमन्त्ये दृष्टान्तहानिः पुनरेव ते स्यात् ॥ ८४ ॥
योगिन्न सोपाधिकभेदवत्त्वं विविक्षितं साध्यमिह त्वदिष्टः ।
औपाधिकस्त्वेश्वरजीवभेदो घटेशभेदो निरुपाधिकश्च ॥ ८५ ॥
घटेशभेदेप्युपाधिर्ह्यविद्या[30] तवानुमानेषु जडत्वमेव ।
वित्वाद[31] भिन्नपरवत्वरासात्केति[32] चात्र प्रतिपक्षहेतुः ॥ ८६ ॥
धर्मिप्रमाबाध्यशरीरभेदोऽस्त्यसंसृता ब्रह्मणि साध्यमिष्टम् ।
त्वयेष्यते ब्रह्मधियात्मभेदो बाध्यो घटादिप्रमया त्वबाध्यः ॥ ८७ ॥
किं कृत्स्नधर्मिप्रमया न बाध्यः किं वा समत्किञ्चन[33]धर्मिबुद्धया ।
घटादिके ब्रह्मणि चात्मभेदस्यैकातु[34] एनस्यात्मनु[35] पूर्वदोषः ॥ ८८ ॥
किञ्चागुणं वा सगुणं मनीषिन् वि(व?)क्षितं धर्मपदेन नान्त्यः ।
भेदस्य तद्बुध्यविबाध्यतेष्टेर्नाद्यश्च तत्रोभयथापि दोषात् ॥ ८९ ॥
किं निर्विशेषं प्रमितं न वाद्यैः[36] प्राप्ताऽश्रयासिद्धिरथ द्वितीये ।
शरीर्यभेदेन परस्य सिद्धेः प्राप्नोति धर्मिग्रहमानकोपः ॥ ९० ॥
भो द्वा सुपर्णा सयुजा सखायेत्याद्या श्रुतिर्भेदमुदीरयन्ती ।
जीवेशयोः पिप्पलभोक्तृभोक्त्रोस्तयोरभेदश्रुतिबाधिताऽसु ॥ ९१ ॥
प्रत्यक्षसिद्धे विफले परात्मभेदे श्रुतिर्नेयमपि प्रमाणम् ।
स्यादन्यथा मानमतत्परोऽपि स्वार्थेऽर्थवादः सकलोऽपि विद्वन् ॥ ९२ ॥
स्मृतिप्रसिद्धाविबोधि वाक्यं यदेष्यते मूलतया प्रमाणम् ।
प्रत्यक्षसिद्धार्थकवाक्यमेवं स्यादेव तन्मूलतया प्रमाणम् ॥ ९३ ॥
श्रुतिः स्मृतेऽर्थे यदि वेदविद्भिर्भवेत तन्मूलतया प्रमाणम् ।
कथं भवेद्भेदकथानभिज्ञैर्ज्ञतिऽपि भेदे परजीवयोः सा ॥ ९४ ॥
जीवेश्वरौ सा वदतीत्युपेत्य प्रावोचमेतत्परमार्थतस्तु ।
विविच्य च त्वा[37] त्पुरुषं समस्तसंसारराहित्यममुष्य ववित ॥ ९५ ॥
यदीयमाख्यात्यथ सत्त्वजीवौ विहाय सर्वज्ञ शरीरभावौ[38] ।
जडस्य भोक्तृत्यमुदाहरन्ती[39] प्रामाण्यमर्हन् कथमश्नुवीत ॥ ९६ ॥

२९. °तद्विधुरो ।
३०. उपधिः ।
३१. चित्त्वात् ।
३२. °दभिन्नः परवत्परस्मादात्मेति ।
३३. स यत्किञ्चन ।
३४. °स्यैक्यात्पुनः ।
३५. स्यान्ननु ।
३६. वान्त्ये ।
३७. सत्त्वात् ।
३८. सर्वज्ञशरीरभाजौ ।
३९. भोक्तृत्व° ।

न चोदनीया वयमत्र विद्वन् यत्तस्त्वया[40] पैङ्ग्यरहस्यमेव ।
अत्तीति सत्त्वं त्वभिपश्यतिज्ञं[41] इति स्म सम्यग्विवृणोति मन्त्रम् ॥ ९७ ॥
शारीरवाची ननु सत्त्वशब्दः क्षेत्रज्ञशब्दः परमार्थवाची ।
तत्राप्यतो नान्यपरत्वमस्य मन्त्रस्य पैङ्ग्योदितवर्त्मनापि ॥ ९८ ॥
तवे हि दित्या हि गिरा हि[42] चित्ते प्रदर्शिता सत्त्वपदस्य वृत्तिः
क्षेत्रज्ञशब्दस्य हि वृत्तिरुक्ता शारीरके द्रष्टरि तत्र विद्वन् ॥ ९९ ॥
येनेति (हि) स्वप्नदृशिक्रियायाः कर्तोच्यते तत्र सजीव एव ।
क्षेत्रज्ञशद्बाभिहितश्च योगिन् स्यात्स्वप्नदृक्सर्ववितीर्णदीश्वरोऽपि[43] ॥ १०० ॥
लिङ्गप्रत्ययेनाभिहितोऽत्र कर्ता तत्तस्त्रिया[44] करणेऽभ्युपेयम्[45] ।
दृष्टा[46] च शारीरतया मनीषिन् विशेष्यते तेन स नेश्वरः स्यात् ॥ १०१ ॥
वृत्तिः शरीरे भवतीत्यमुष्मिन्नर्थे हि शारीरपदस्य योगिन् ।
तस्मिन् भवन्सर्वगतो महेशस्तदन्नशारीर[47]पदाभिधेयः ॥ १०२ ॥
भवं[48] शरीरादित तत्र[49] चेशः कथं नु शारीरपदाभिधेयः ।
नभः शरीरेऽपि भवत्यथापि न केऽपि शारीरमितीरयन्ती ॥ १०३ ॥
यद्येष मन्त्रोऽनभिधाय जीवप्राज्ञौ वदेद्बुद्धिशरीरभावौ ।
अत्तीति भोक्तृत्वमचेतनाया बुद्धेर्वदन्[50] तर्हि कथं प्रमाणम् ॥ १०४ ॥
आदारुकस्याप्ययशः कृशानोराश्लेषणाद्दाहकं युदेष्वा[51] ।
तथैव भोक्तृत्वमचेतनाया बुद्धेरपि स्याच्चिदनुप्रवेशात् ॥ १०५ ॥
छायातपायद्ववतीव[52] भिन्नौ जीवेश्वरौ तद्वदिति ब्रुवाणा ।
ऋतं पिबन्ताविति कारकेषु[53] श्रुतिस्त्वभेदश्रुतिबाधताऽस्तु ॥ १०६ ॥
भेदं वदन्ती व्यवहारसिद्धं न बाधते भेदपरश्रुतिः[54] सा ।
एषा त्वपूर्वार्थतया बलिष्ठा भेदश्रुतेः प्रत्युत बाधिका स्यात् ॥ १०७ ॥

४०. यतस्त्वया ।
४१. ज्ञइति ।
४२. तदेतदित्यादिगिरा .... ।
४३. सर्वविदीश्वरोऽपि ।
४४. ततस्तृतीया ।
४५. °अभ्युपेया ।
४६. द्रष्टा ।
४७. कथं न ।
४८. भवन् ।
४९. शरीरादितरत्र ।
५०. वदेत् ।
५१. दाहकता ययाऽऽस्थे ।
५२. छायातपौ यद्वतीव ।
५३. काठकेषु ।
५४. °श्रुति ।



मानान्तरोपोद्बलिता हि भेदश्रुतिर्बलिष्ठा यमिनां वरेण्य ।
तद्बाधितुं सा प्रभवत्यभेदश्रुतिप्रमाणान्तरबाधितार्थाम् ॥ १०८ ॥
प्राबल्यमापादयति श्रुतीनां मानान्तरान्नैव बुधाग्रयायिन् ।
गतार्थतादानमुखेन तासां दौर्बल्यसंपादकमेव किं तु ॥ १०९ ॥
इत्याद्यैः प्रबलतरैः स युक्तिजाते[55] दुःशङ्कानिपुणतरैर्निरस्य तास्ताः ।
आचख्यौ परतरजीवयोरभेदे मानं प्रथितयशाः परःशतानि ॥ ११० ॥

इति श्रीभरद्वाजकुलजलधिचन्द्रश्रीतिरुमलकोण्डुभट्टोपाध्याय--तनय-श्रीमत्परमशिवेन्द्रपादाब्जसेवापरायणश्रीतिरुमलदीक्षि--तेन कृते शङ्कराभ्युदये महाकाव्ये चतुर्थः सर्गः ॥

**( अथ पञ्चमस्सर्गः । )**

**॥ श्रीसाम्बाय नमः ॥**

इति संयमिक्षितिपतेर्वचनैर्निगमार्थनिर्णयकरैः सनयैः ।
शमिताग्रहोऽ(पि पुनरप्यवदत्कृतसंशयः सपदि कर्मजडः ॥ १ ॥
यतिराज सम्प्रति ममाभिनवान्मभिषादितो[1]स्त्यपजयादपि तु ।
अपि जैमिनीयवचनान्यहहोन्मथितानि हीति भृशमस्ति कृशः ॥ २ ॥
स हि वेत्त्यनागतमतीतमपि प्रियकृत्समस्तजगतोऽधिकृतः ।
निगमप्रवर्तनविधौ न कथं तपसां सिद्धिर्वितथसूत्रवदः[2] ॥ ३ ॥
इति संदिहानमवदत्तमसौ न हि जैमिनावपनयोऽस्ति मुनौ ।
प्रमिमीमहे न वयमेव मुनेर्हृदयं यथावदनभिज्ञतया ॥ ४ ॥
यदि विद्यते कविजनाविदितं हृदयं मुनेस्तदिह वर्णय भोः ।
यदि युक्तमत्र भवता कथितं हृदि तृटदहंकृतयः[3] ॥ ५ ॥
अभिनन्दिमान[4] पितरे विषयप्रसरन्मतीननुजिघृक्षुरसौ ।
तदवाप्तिसाधनतया सकलं सुकृतं न्यरूरुपदिति स्म[5] परे[6] ॥ ६ ॥
वचनं तमेतमिति धर्मचयं विदधाति बोधजनिहेतुतया ।
तदपेक्षयैव स च मोक्षकरो निरधारयन्न परथेति वयम् ॥ ७ ॥
श्रुतयः क्रियार्थकतया सफला अतदर्थकानि तु वचांसि वृथा ।
इति सूत्रयन्ननु कथं मुनिराडपि सिद्धवस्तुपरतां मनुते ॥ ८ ॥
श्रुतिराशिरद्वयपरोऽपि परम्परयाऽऽत्मबोधफलकर्मणि च ।
प्रसरत्कटाक्ष इति कार्यप्रसरत्वमसूचि तत्प्रकरणस्य गिराम् ॥ ९ ॥

५५. युक्तिजातैर्दुःशङ्का° ।
१. °नवान्न विषादितो° ।
२. निर्धिवितथसूत्रपदः ।
३. दलदहं° ।
४. अभिसन्धिमानपि परे ।
५. न्यरूपयदिति ।
६. परम् ।

ननु सच्चिदात्मपरताऽभिमता यदि कृत्स्नवेदनिचयस्य मुनेः ।
फलदातृतामपि वृषभष्यवरन्[7] स कथं निराह परमेशमपि ॥ १० ॥
जनिमत्सकर्तृकमिदं जगदित्यनुमानमागमवचांसि विना ।
परमेश्वरं प्रथयति श्रुतयस्त्वनुवादमात्रमिति काणभुजाः ॥ ११ ॥
न कथंचिदौपनिषदं पुरुषं मनुते बृहन्तमिति वेदवचः ।
कथयन्त्यवेदविदगोचरतां गमयेत्कथं तमनुमानमिदम् ॥ १२ ॥
इति भावमात्मनि निधाय मुनिः स निराकरोन्निशितयुक्तिशतैः ।
अनुमानमीश्वरपरं जगतः प्रभवं लयं फलमपीश्वरतः ॥ १३ ॥
तदिहास्मदुक्तविधया निषदा न विरुद्धमण्वपि मुनेर्वचसि ।
इति गूढभावमनपेक्ष्य बुधास्तमानीशवाद्ययति[8] ब्रुवते ॥ १४ ॥
किमु तावतैव निरीश्वरवाद्यभवत्परात्मविदुषां प्रवरः ।
न निशाटकाहिततवं[9] क्वचिदप्यहनि प्रभां मलिनयेत्तरणेः ॥ १५ ॥
इति जैमिनीयवचसां हृदयं कथितं निशम्य यतिकेसरिणा ।
मनसा कविराण्नितरां सहशारदाश्च सदस्पतयः ॥ १६ ॥
विदिताशयोऽपि परिवर्तिमनाग्विशयः स जैमिनिमवाप हृदा ।
अवगन्तुमस्य वचसाऽपि पुनः स च संस्मृतः सविधमाप कवेः ॥ १७ ॥
अवदच्च शृण्वति स भाष्यकृति प्रजहा किं[10] संशयमिमं सुमते ।
यदवोचदेष मम सूत्रततेर्हृदयं तदेव मम नापरथा ॥ १८ ॥
स(न?)ममैव वेद हृदयं यमिराडपि तु श्रुतेः सकलशास्त्रततेः ।
यदभूद्भविष्यति भवत्तदपि ह्ययमेव वेद न तथा त्वितरः ॥ १९ ॥
गुरुणा वि(चि?)देकरसतत्त्वरतां निरणायि हि श्रुतिशिरोवचसाम् ।
कथमेकसूत्रमपि तद्विमतं कथयाम्यहं तमपसाधितधीः[11] ॥ २० ॥
अलमाकलय्य विशयं सुयशा शृणु मे वह्यस्यमिममेव[12] परम् ।
त्वमवेहि संसृतिनिमग्नजनोत्तरणे गृहीतवपुषं पुरुषम् ॥ २१ ॥
इति बोधितद्विजवरोऽन्तरधान्मनसोपगूह्य यमिनामृशभम् ।
स च यायजूकपरिषत्प्रमुखः प्रणिपत्य शङ्करमवोचदिदम् ॥ २२ ॥
विदितो हि संप्रति भवाञ्जगतः प्रकृतिर्निरस्तसमतातिशयः ।
अवबोधमात्रवपुरप्यबुद्धोद्धरणाय केवलमुपात्ततनुः ॥ २३ ॥

७. °दातृतामपुरुषस्य वदन् ।
८. तमनीशवाद्ययमिति ।
९. निशाटनाहिततमः ।
१०. प्रजहाहि ।
११. तमपसादितधीः ।
१२. रहस्य° ।



जगदार्तिहन्ननवगम्य पुरा महिमानमीदृशमचिन्त्यमहम् ।
यदहं युरब्रुवमसाम्प्रतमप्यकलं[13] क्षमस्व करुणाजलधे ॥ २४ ॥
कपिलाक्षपादकणभुक्प्रमुखा अपि मोहमीयुरमितिप्रतिभाः ।
श्रुतिभावनिर्णयविधावितरः प्रभवेत्कथं परशिवावहृति[14] ॥ २५ ॥
कथमल्पबुद्धिकृतदुर्वि[15] प्रबलोरगक्षतिहताः श्रुतयः ।
न यदि त्वदुक्त्यमृतनेकदृशा[16] विहरेयुरात्मनि[17] धृतानुशयाः ॥ २६ ॥
भवदुक्तसाक्तृमृतभानुकरा[18] न चरेयुरार्य यदि कः शमयेत् ।
अतितीव्रसुदुःसहभवोष्णकरप्रचुरातपस्त्रं[19] भवतापमिमम् ॥ २७ ॥
बत कर्मयन्त्रमधिपद्य[20] तपः श्रुतगेहदारसुतभृत्यधनैः ।
अतिगूढमानभरितः पतितो भवितोऽस्मि धृतास्मिन्[21] भवकूपबिलात् ॥ २८ ॥
अहमाचरं बहुतपो सुकरं ननु पूर्वजन्मपुन[22]चेदधुना ।
जगदीश्वरेण करुणानिधिना भवता कथा मम कथं घटते ॥ २९ ॥
त्रिदिवौकसामपि पुमर्थकरीमिह संसरज्ज(न)विमुक्तकरीम् ।
करणोन्मिलां[23] तव कटाक्षझरीमवगाहतेऽत्र खलु धन्यतमः ॥ ३० ॥
तदहं विसृज्य सुतदारगृहद्रविणादिकर्म च गृहेऽपिहितम् ।
शरणं वृणोमि भवतश्चरणावनुशाधि किंकरमिमं कृपया ॥ ३१ ॥
इति सूनृतोक्तिभिरुदीर्णगुणः सुधियात्मवाननुजिघृक्षुरसौ ।
समथैक्षतास्य[24] सहधर्मशरीरिविदिता[25] कया मुनिमभाषत सा ॥ ३२ ॥
यतिपुण्डरीक तव वेद्मि मनो ननु पूर्णमेव विदितं च मया ।
इह भावि तापसमुखादखिलं तदुदीर्यते शृणु ससभ्यजनः ॥ ३३ ॥
मयि जातु मातुरुपकण्ठजुषि प्रवयास्तपित्प्रतिभटाच्छजटः[26] ।
सितभूतिरूषितसमस्ततनुः श्रवणाभ्यायादपरसूर्य[27] इव ॥ ३४ ॥

१३. अखिलं ।
१४. परशिवांशमते ।
१५. °बुद्धिविवृतिप्रचय ।
१६. °क्त्यमृतसेकधृता ।
१७. °रात्मविधृता° ।
१८. °दुक्तसूत्तयमृत° ।
१९. °प्रचुरातपप्रभवताप° ।
२०. °मधिरुह्य ।
२१. भवतोद्धृतोऽस्मि ।
२२. पूर्वजन्मसु न चेदधुना ।
२३. करणोर्मिलां ।
२४. समुदैक्षतास्य ।
२५. सहधर्मचरीं विदिताशया ।
२६. प्रभया तडित्प्रतिभ[illegible]च्चजटः ।
२७. श्रमणोऽभ्ययादप[illegible] ।

परिगृह्य पाद्यमुखयाऽर्हणया रचिताञ्जलिर्नमितपूर्वतनुः।
जननी तदात्तपरिवस्यममुं मुनिमन्वयुङ्क्त मम भाव्यमखिलम् ॥ ३५ ॥
भगवन्नवेहि[28] भर्तुर्मम भाव्यशीलं च वेत्ति तपसा हि भवान्।
प्रणते जने हि सुधियः कथयन्त्यपि गोप्यमार[29]सदृशाः कृपया ॥ ३६ ॥
कियदायुराप्स्यति सुतान् कति वा दयितं कथंविधमुपेष्यति च।
अथ च ऋतूनपि करिष्यति मे दुहिता प्रभूतधनधान्यपति[30] ॥ ३७ ॥
इति पट्टभाविचरितः[31] प्रसुवा क्षणमात्रमीलितविलोचनकरः[32] ।
सकलं क्रमेण कथयन्निदमप्यपरं जगाद सुररहस्यमपि ॥ ३८ ॥
निगमाध्वनि प्रबलबाह्यमतैरमितैरधिक्षितितिद्रुहिणः[33] ।
पुनरुद्दिधीर्षुरवतीर्य खलु प्रतिभाति मण्डनमिषेण महीम् ॥ ३९ ॥
तमवाप्य धूर्जटिमिवाद्रिसुता दुहिता तवाच्युतमिवाब्धिसुता।
अनुरूपमाहृतसमस्तमखा ससुता भविष्यति चिरं मुदिता ॥ ४० ॥
अथ नष्टमौपनिषदं प्रबलैः कुमतैः कृतान्तमिह साधयितुम्।
ननु मानुषं वपुरुपेत्य शिवः सकलं करिष्यति धरान्वपदैः[34] ॥ ४१ ॥
सह तेन वादमुपगम्य चिरं दुहितुः पतिस्तु यतिवेषजुषा।
विजितस्तमेव शरणं जगतां शरणं गमिष्यति विसृष्टगृहः ॥ ४२ ॥
इति गामुदीर्य स मुनिः प्रययौ सकलं यथातथमभूच्च मम।
भवदीयशिष्यपदमस्य कथं वितथं भविष्यति मुनेर्वचसि ॥ ४३ ॥
अपि तु त्वयाऽद्य न समग्रजितः प्रथिताग्रणीर्मम पतिर्यदहम्।
वपुरर्धमस्य वनिता मतिमन्नपि मां विजित्य कुरु शिष्यमिमम् ॥ ४४ ॥
यदपि त्वमस्य जगतः प्रभवो ननु सर्वविच्च परमः पुरुषः।
तदपि त्वयैव सह वादकृते हृदयं बिभर्ति मम तूत्कलिकाम् ॥ ४५ ॥
इति यायजूकसहधर्मचरीकथितं वचोऽर्थवरगर्ह्यपदम्[35] ।
मधुरं निशम्य मुदितः सुतरां प्रतिवक्तुमैहत यतिप्रवरः ॥ ४६ ॥
यदि[36] वादिकलहोत्सुकतां प्रतिपद्यते हृद(य)मित्यबले।
तदसाम्प्रतं न हि महायशसो महिलाजनेन कथयन्ति कथाम् ॥ ४७ ॥
स्वमतं प्रभेत्तुमिह यो यतते स वधूजनोऽस्तु यदि वास्त्वितरः।
यतितद्य(व्य?)मेव खलु तस्य जये निजपक्षरक्षणपरैर्भगवन् ॥ ४८ ॥

२८. भगवन्न वेद्मि दुहितु°।
२९. °मार्य°।
३०. °धान्यवति ।
३१. °पृष्ट।
३२. °लोचनकः ।
३३. °धिक्षिति खिले द्रुहिणः ।
३४. समलंकरिष्यति धरां स्वपदैः।
३५. °र्थवदगर्ह्य°।
३६. यदवादि कलहो°।



अत एव गार्ग्यभिधाय[37] कलहं सह याज्ञवल्क्यमुनिराडकरोत्।
जनकस्तथा सुलभयाऽबलयांममी[38] भवन्ति न यशोनिधयः ॥ ४९ ॥
इति युक्तिमद्गदितमाकलयन्मतान्तरः[39] श्रुतिसरिज्जलधिः।
न तया विवादमधिदेवतया वचसामियेष विदुषां सदसि ॥ ५० ॥
अथ संकथा प्र(व)वृते स्म तयोरुभयोः परस्परजयोत्सुकयोः।
मतिचातुरीरचितशब्दझरी श्रुतिविस्मयीकृतविचक्षणयोः ॥ ५१ ॥
अनयोर्विचित्रपदयुक्तिभरैर्निशमय्य संकथनमाकलितम्।
अफणीशमप्यतुलयन्[40] कवयो न बृहस्पतिं किमपरं जगति ॥ ५२ ॥
न दिवा न निश्यतिचरादकथा[41] विरराम नैय्यमिककालमृते।
इति जल्पतोः सममनल्पधियो दिवसाः सप्तदश चात्यगमन् ॥ ५३ ॥
अथ शारदाकृततवा कमुवाक्प्रमुशेष्वखिलेषु[42] शास्त्रनिचयेषु परम्।
तमजेय्यमात्मनि विचिन्त्य मुनिं पुनरप्यचिन्तयदिदं मनसा ॥ ५४ ॥
अति बाल[43] एव कृतसंन्यसनो नियमैयन् यैरविधुरश्चसनो[44] ।
मदनागमेष्वकृतबुद्धिरयं तदकेन[45] संप्रति जयेयमहम् ॥ ५५ ॥
इति संप्रधार्य तमपृच्छदसौ कुसुमास्त्रशास्त्रहृदयं विदुषी।
विदितागमोऽपि स रिरक्षयिषुर्नियमं जगाद जगति व्रतीनाम् ॥ ५६ ॥
इह मासमात्रमवधिः क्रियतामनुमन्यते यदि सदस्यगणः।
तदनन्तरं सुदति हास्यसि भोः कुसूमेषुशास्त्रनिपुणोत्सवमिति[46] ॥ ५७ ॥
उररीकृतेनतिदधेति[47] तया क्रमते स्म योगिमृगराड्गगनम्।
अतिविग्रहैः सह विनेयवरैर्निगमैरिव त्रिभिरखण्डपरैः ॥ ५८ ॥
अवगाहमानपरैकपदिमनवद्यचर्यमनुयन्विनयाति।
अनहंकृद्रममास्त्रकलकलनेच्छुमब्दचरणोऽभिदधौ ॥ ५९ ॥
व्रतमस्मदीयमतुलं क्व महत्क्व च कामशास्त्रमतिगर्ह्यपदम्।
तदपीष्यते भवतैव यदि ह्यनवस्थितं जगदिहैव भवेत् ॥ ६० ॥
अधिमेदिनि प्रथयितुं शिथिलं धृतकङ्कणस्य यतिधर्ममिमम्।
भवतः किमस्त्यविदितं तदपि प्रणयान्मयोधितं विदं[48] भगवन् ॥ ६१ ॥

३७. गार्ग्यभिधया।
३८. °बलया किममी।
३९. मुदितान्तरः ।
४०. न फणीश° ।
४१. निश्यपि च वादकथा।
४२. शारदाऽकृतकवाक्प्रमुखे° ।
४३. अतिबाल्य° ।
४४. नियमैः परैरविधुरश्च सदा।
४५. तदनेन ।
४६. निपुणस्त्वमिति।
४७. उररीकृते सति तथेति।
४८. मयोदितमिदं ।

स निशम्य पद्मचरणस्य गिरं गिरते स्म गीषरानिभप्रतिभः[४९]।
अविगीतमेव भवता फणितं श्रृणु सौम्य वच्मि परमार्थमिमम् ॥ ६२ ॥
अविचार्य यस्तु वपुराद्यहमित्यभिमन्यते जडमतिः सुदृढम् ।
तमबुद्धतत्त्वमधिकृत्य विधिप्रतिवेधशास्त्रम (खिलं) सफलम् ॥ ६३ ॥
कृतधीस्त्वनाश्रममवर्णमजात्यवबोधमात्रमजमेकरसम् ।
स्वतयाऽवगत्य न भजेन्निवसन्निगमस्य मूर्ध्नि विधिकिंकरताम् ॥ ६४ ॥
कलशादि मृत्प्रभवमस्ति यथा मृदमन्तरा न जगदेवमिदम् ।
परमात्मजस्यमपि[५०] तेन विना समयत्रयेऽपि (न) समस्ति खलु ॥ ६५ ॥
कथमज्यते जगदशेषमिदं कलयन्मृषेति हृदि कर्मफलैः ।
न फलाय हि स्वपनकालनृतं[५१] सुकृतादि जात्वनृतबुद्धिहृतम् ॥ ६६ ॥
तदयं करोतु ह(य)मेक[५२]शतान्यमितानि विप्रहननान्यथवा ।
परमार्थविन्न सुकृतैर्दुरितैरपि लिप्यतेऽस्तमितकर्तृतया ॥ ६७ ॥
अवधीत्त्रिशीर्षमददाच्च यतीन्वृकमण्डलाय कुपितः शतशः ।
बत लोमहानिरपि तेन कृता न शतक्रतोरिति हि बह्वृचगीः ॥ ६८ ॥
बहुदक्षिणैरय(ज)त क्रतुभिर्विबुधानतर्पयदसंख्यधनैः ।
जनकस्तथाप्यभयमाप परं न तु देहयोगमिति काण्ववचः ॥ ६९ ॥
न विहीयते हि रिपुवद्दुकि (रि?) तैर्न च वर्धते जनकनिकृतैः[५३]।
न स तापमेत्यकरवं दुरितं किम(हं) न साध्वकरवं त्विति माम् ॥ ७० ॥
तदनङ्गशास्त्रपरिशीलनमप्यमुनैव साम्यकरणेन कृतम् ।
न हि दोषकृत्तदपि शिष्टसरण्यवनार्थमन्यवपुरेत्य यते ॥ ७१ ॥
इति सत्कथाः स कथनीययशाः भवभीतिभञ्जनकरीः कथयन् ।
सुदुरासदं चरणचारिजनैर्गिरिशृङ्गमेत्य पुनरेव जगौ ॥ ७२ ॥
अधिसानुपश्यत[५४] विभाति गुहा पुरतः शिला समतला विपुला ।
सरसी च तत्परिसरेऽच्छजला फलभारनम्रतरुरम्यतटा ॥ ७३ ॥
परितामिह[५५] वसद्भिरिदं वप्ररप्रमादमनवद्यगुणाः[५६]।
अहमास्थितस्तदुभि (चि?) करणं कलयामि यावदसमेषु कालाम्[५७] ॥ ७४ ॥
इति शिष्यवर्गमनुशास्य यमिप्रवरो विसृष्टकरणोऽधिगुहम् ।
दिशमातिवाहिकशरीरयुतः समधिष्टे तां सघनदेन ययौ ॥ ७५ ॥

४९. गीष्पतिनिभ° ।
५०. परमात्मजन्यमपि ।
५१. °कालकृतं ।
५२. हयमेध° ।
५३. जनकवत्सुकृतैः ।
५४. अथ साऽनुपश्यत ।
५५. परिपाल्यतामिह ।
५६. वपुर° ।
५७. °समेषु कलाम् ।



स ददर्श कुत्रचिदमर्त्यमिव त्रिदिवच्युतं विगतसत्त्वमपि ।
मनुजेश्वरं (परि.) वृतं प्रलपत्प्रमदाभिरार्तिमदवा(मा) त्यजनम् ॥ ७६ ॥
स निशम्य योगिवृषभः करुणं तरुणीजनस्य रुदितं सपदि ।
द्रुतमानसः परमकारुणिकः प्रविवेश साममरकस्य तनुम् ॥ ७७ ॥
आदौ तदङ्गमुदयन्मुखकान्ति पश्चान्मा(न्ना?)सान्तनिर्यदनिलं शनकैः परस्तात् ।
उन्मीलदङ्घ्रिचलनं तदनूव्य(द्य?)दक्षिव्याकोचमुद्धितमुपात्तबलं क्रमेण ॥ ७८ ॥
तं प्राप्य जीवमुपलभ्य पतिं प्रभूतहर्षस्वनाः समुदितासनपङ्कजास्ताः ।
नार्यो विरेजुररुणोद(य)संप्रफुल्लपद्माः ससारसरवा इव पङ्कजन्यः ॥ ७९ ॥
हर्षं तासामुदितमतुलं वीक्ष्य वामेक्षणाना—
मात्तप्राणं नृपमहि(पि?) महामात्यमुख्याः प्रहृष्टाः ।
दध्मुः शङ्खान्पणवपटहा दुन्दुभी(श्चा)भिजघ्नुः
तेषां घोषाः सपदि बधिरीचक्रिरे द्यां भुवं च ॥ ८० ॥

॥ इति श्रीमद्धाजकुल(जल-)धिचंद्रश्रीतिरुमलकोण्डुभट्टोपाध्यायतनय–
श्रीपरमशिवेन्द्रपादाब्जसेवापरायणश्रीतिरुमलदीक्षिते विरचिते
शङ्करभ्युदये महाकाव्ये पञ्चमः सर्गः ॥

**( अथ षष्ठस्सर्गः । )**

**॥ श्रीसाम्बसदाशिवाय नमः ॥**

अथ पुरोहितमन्त्रिपुरःसरैर्नरपतिः कृतशान्तिककर्मभिः ।
विहितमाङ्गलिकः समयोचितं नगरमास्थितभद्रगजे ययौ ॥ १ ॥
समधिगम्य पुरं परिसान्त्वितप्रियजनैः सचिवैः सह संमतैः ।
भुवमपालयदादृतशासनो नृपतिभिर्दिवमिन्द्र इवाधिराट् ॥ २ ॥
इति नृपत्वमुपेत्य वसुन्धरामवति संयमिभूभृति मन्त्रिणः ।
तमधिकृत्य परं कृतसंशया इति जजल्पुरनल्पधियो मिथः ॥ ३ ॥
मृतिमुपेत्य यदा पुनरुत्थितः प्रकृतिभाग्यवशेन तदाद्ययम् ।
नरपतिः प्रतिभाति न पूर्ववत्समुदिताखिलदिव्यगुणोदयः ॥ ४ ॥
वसु ददाति ययातिरिकर्थिने वदति गीष्पतिवद्गिरमर्थवत्[१]।
जयति फाल्गुनवत्प्रतिपार्थिवान् सकलमप्यवगच्छति शर्ववत् ॥ ५ ॥
अनुसवनविसृत्वरैरपूर्वैर्वितरणपौरुषशौर्यधैर्यपूर्वैः ।
अनितरसुलभैर्गुणैर्विभाति क्षितिपतिरेष वरः[२] पुमानिवाद्य[३] ॥ ६ ॥
अनृतुषु तरवः सुपुष्पिताग्रा बहुतरदुग्धदुघाश्च गोमहिष्यः ।
क्षितिरभिमतवृष्टिरात्तसस्या स्वविहितधर्मरताः प्रजाश्च सर्वाः ॥ ७ ॥

१. °अर्थविन् ।
२. परः ।
३. °वाद्यः ।

कालस्तिष्यः सर्वदोषाकरोऽपि त्रेतामत्येत्यद्य राज्ञः प्रभावात् ।
तस्मादस्मद्राजवर्ष्म प्रविश्य प्राप्तैश्वर्यैः शास्ति काश्चिद्धरित्रीम् ॥ ८॥
एतत्त्यक्त्वा वर्ष्म योगीश्वरोऽयं कायं यावन्न प्रयायात्स्वकीयम् ।
भक्त्याऽस्माभिः सावरोधे सपौरैर्यातैस्तावत्प्रीतियुक्तो विधेयः ॥ ९ ॥
पुरोहितामात्यपुरःसराः प्रजा नृपं विनिश्चित्य परं पुमानिति ।
अतोषयन् सै(?)रसुवर्तनैस्तथा यथा न तद्राज्यमपास्य यास्यति ॥ १० ॥
दिशासु नोपाहतशासनोऽखिलान्वहोभिरल्पैरधिराज्यमूर्जितम् ।
निधाय मन्त्रीष्वथ कामिनीसुखं चकुर्द्ध शुद्धान्तचरश्चिरं वशी ॥ ११ ॥
तस्य खेलनरतेरहर्निशमासने शबलितस्य दर्शनम् ।
गाननर्तनविशारदान्विना मन्त्रिणामपि बभूव दुर्लभम् ॥ १२ ॥
श्रमहारिमन्दमलयानिलोल्लसद्विविधप्रसूनविनमन्महीरुहम् ।
कलकोकिलस्वनसमेधितस्मरं कुमुदोत्पलाम्बुजमनोज्ञदीर्घिकम् ॥ १३ ॥
प्रमदावनमेत्य मानदः प्रमदाभिः समदाभिरावृतः ।
कुसुमापचयेच्छयान्वगाच्च चरणाभ्यां स नगान्मगं शनैः ॥ १४ ॥
कुसुमेषु रणोत्सुका अपि कुसुमेषुप्रियतां दधुः स्त्रियः ।
कुसुमेषु समाश्रयाधृताः कुसुमेषुक्षतविग्रहा अपि ॥ १५ ॥
सत्रा तत्राशोकवने रमणीभिः सुत्रामाभश्चित्रसुमानि विचिन्वन् ।
स्विद्यद्गात्रो वारिचकुर्दनमिच्छन्नच्छोदाभं स्वच्छजलं ह्रदमागात् ॥ १६ ॥
अञ्जलिस्थैर्जलैः काश्चिदन्वाकिरन् हेमशृङ्गाहृतैः काश्चिदन्वाकिरन् ।
कुसुमैः पङ्किलैः काश्चिदन्वाकिरन्नीक्षणैर्निश्चलैः काश्चिदन्वाकिरन् ॥ १७ ॥
ताः प्रेयसाप्यलसिषुः किल सिच्यमानाः क्लिन्नाम्बरा विवृतगात्रकुचोरुमध्या ।
औत्सुक्यमुक्तकबरीच्यवमानमाल्याः सव्रीडहासपरसेक्षणचारुवक्त्राः ॥ १८ ॥
नारोधि तेन जलकेलिषु वारिसेकसंसिक्तसूक्ष्मवसनान्तरदृश्यमानैः ।
अङ्गैरनङ्गकरणैर्मदिरेक्षणानां चेतश्चिदात्मरतमप्यपकृष्यमाणम् ॥ १९ ॥
मुक्तास्यापि स्मरकललोदारादां राज्ञः सुरभिजलोत्कासारात् ।
सारात्पुंसामुदितरसा एतैरुस्ते रुक्माभाः करधृतलीलाम्भोजाः ॥२०॥
खेलालोले राजनि राजीवदलाक्षे क्रुद्धां रात्रीं खण्डितरूपामनुनीय ।
साम्मा नेतुं तत्प्रहिताप्तसखीव प्रायादाशां पाश्यभिगुप्तां रविदीप्तिः ॥ २१ ॥
सदयनमतिलङ्घ्यो मार्गगामी विवस्वान् मृदितकुमुदिनीकोषाश्च मुष्णन् प्रताप्य ।
बहुजनमतिरक्तो वारुणीं चोपगच्छन्ध्रुवमधिगतभीतिराजतोऽद्धा विलिल्ये ॥२२॥
असूर्यमदिवारात्रममृगाङ्कमतारकम् ।
अतमस्कमभाच्छुद्धं ब्रह्मेवात्मप्रभं नभः ॥ २३ ॥
कुङ्कुमशोणपयोधरशोभिन्यञ्चितकाव्यनिटा ललामा ।
राजति राजसमागमलुब्धा वासकसज्जनवधूरिव सन्ध्या ॥ २४ ॥



मुदं विश्लिष्टानां कुवलयसखीनामुदवहन्
शुचं संत्रस्तानां हृरिदलिकचानामपनयन् ।
क्षिपञ्ज्योत्स्नामच्छां दिशि दिशि चकोरप्रणयिनीं
दिशन्वृद्धिं वार्धेरुडुपतिरुदरस्थात्तिमिरहा ॥ २५ ॥
द्विजानां राजन्ये विशति घनवीथीं युवतिभिः
सुराणां व्याकीर्णैरचितसितलाजाः सकुसुमाः ।
भ्रमन्तस्तेऽद्यापि द्युसदनपथे वायुवशगा निगद्यन्ते तारा इति जगति
जाड्यात्कतिपयैः ॥ २६ ॥

स्फटिकफलके ज्योत्स्नाशुभ्रे मनोज्ञशिरोगृहे वरयुवतिभिर्दीप्यन्नक्षै[4] दुरोदरकेलिषु ।
अधरदशनं बाहूबन्धं महोत्पलताडनं रतिविनिमयं राजाऽकार्षीद्गृहं[5]
विजये मिथः ॥ २७ ॥

अधरसु हि[6] श्लेषाद्वच्यं सुगन्धि मुखानिलव्यतिकरवशात्कामं कान्ता
करात्तमिति प्रियम् ।
मधु म(द)करं पायं पायं प्रियाः समसा (पा?) ययत्कनकचषकैरिन्दुच्छाया-
परिष्कृतमादरात् ॥ २८ ॥

मधुमदकलं मन्दस्विन्नं मनोहरभाषणं निबिडपुलकं सीत्काराढ्यं सरोरुहसौरभम् ।
दरकलितदृष्टीषल्लज्जं विसृत्प (त्व?)रमन्मथं प्रचलदलकं कान्तावक्त्रं
निपीय कृती नृपाः ॥ २९ ॥

विसृतजघनं[7] संदष्टोष्ठं प्रणुत्पयोधरं[7A] प्रसृतमणिणं[8] प्राप्तोत्साहं रणन्मणिमेखलम् ।
निभृतकरणं नृत्यद्गात्रं गलेतरभावनं[9] प्रसृमरसुखं प्रादुर्भूतं किमप्यपदं गिराम् ॥ ३० ॥
मनसिजकलातत्त्वाभिज्ञो मनोज्ञविचेष्टितः सकलविषयव्यावृत्ताक्षः सदानुसृतोत्तमः ।
कृतकुचगुरूपास्त्याऽत्यन्तं स निर्वृतमानसो निधुवनपरं ब्रह्मानन्दं निरर्गलमन्वभूत् ॥३१॥
प्रफुल्लबिसिनीवनप्रणयसंसृजं सौरभाः प्रवाहनिवहाश्रयप्रसृतिमत्पृषच्छीतलाः ।
प्रभूतसुरतश्रमं प्रशमयन्त राणीदृशां प्रभातमरुतो वपुः प्रचलिकालकान्तास्ततः ॥३२॥
कृशांशुशशभृन्मुखी शिथिलतारकाभूषणा गलत्तिमिरकुन्तला प्रतनुकौमुदी पाण्डुराः ।
सरोजनयनस्रवत्तुहिनबाष्पभिन्नानना ललास विलयोन्मुखी विरहिणीव कार्श्यं गता ॥३३॥

४. दीव्यन्नक्षैः ।
५. ग्लहं ।
६. अधरजसुधाश्लेषा° ।
७. विवृत° ।
७A. प्रणुन्नपयोधरं ।
८. प्रसृतभणितं ।
९. गतेतर° ।

ततः श्रुतिसुखावहैर्ललितगीतनृत्तस्वनैर्महार्हवरवर्णिनी रुचिरभूषणोद्भूषणैः।
पतत्कलकलारवैर्महितगीतसूतस्तवैरपूरि नृपधाम तद्विविधवाद्यघोषैरपि ।। ३४ ।।

आप्रत्यूषमिहानुभूय सुभगा ज्योत्स्नामुखा वल्लभा।
कामस्यान्तमनाप्नुवन् पुनरपि प्रोद्भूतरागः शशी।
भक्ता मत्पतिनोपगच्छति परां मुक्ताम्बरोस्तत्रपो[10]।
हा हेति प्रजहास काश्यपि करव्याजेन पौरन्दरी ।। ३५ ।।

मन्दतैर्वसुसञ्चयैरुडुपतिर्वृद्धिगतोऽयं शनै-
र्मायि चाविगणय्य दुष्टहृदयो मत्प्रेयसीं पद्मिनीम्।
आक्रम्य श्रियमुज्जिहार तवलं स्नेहेन हन्यामिति
क्रोधावेशवशेन पाटलतनुस्तेजोनिधिनिर्ययौ ।। ३६ ।।

सुधापानासक्ता अदशललनारत्नचषकं
किमीशानाराते भुवनजयिनः छत्रमरुणम्।
किमैन्द्रीहस्ताब्जद्युतिभिररुणं दर्पणतलं
त्विषां पत्युर्बिम्बं समुदितमतर्क्येवममलम् ।। ३७ ।।

पूर्वाद्रिशिखरारूढे भगवत्यंशुमालिनि। त्रिजगत्कज्जलाम्भोधेः समुद्धृतमिवाबभौ ।।३८।।

क्षपानाथाश्लेषादुषितबहुदोषां प्रथमतः। पुनः पश्यन्कान्तां मधुपकृतसञ्ज्ञां कमलिनीम्।
तदाशामुत्सृज्य प्रशमिततमास्त्यक्तनिलयः। पदं विष्णोर्भेजे बहुतरविरक्तो दिनकरः ।। ३९ ।।

नरपतिमपि मङ्गलैस्तूर्यनादैर्विनिद्रो मनाग्दिनमुखाविहितं विधायाङ्गनासङ्गमासक्तधीः।
मनसिजसमयाशयं कामिनीषु स्फुटं वर्धयन्स्वविहितसमयावधि शिष्यसंघे पुरानात्मरतिः ।। ४० ।।

अपि सुविदितवेदनीयः पुमान्मानिनीसङ्गतो यदि भवति तदैव नूनं जहाति स्थितिं पौर्विकीम्।
स्फुटयितुमिति नव्यतीत्यवधिं चाप्यवात्सीत्तदप्यमरनृपभामिनीनां तेजोवैभवस्योन्नतिः ।। ४१ ।।

पाराशर्यवनिभृति प्रविश्य राज्ञो वर्ष्मैवं विहरति तद्विलासिनीभिः।
दृष्ट्वा तत्समयमतीतमन्यशिष्या रक्षन्तो वपुरितरेतरं जजल्पुः ।। ४२ ।।

आचार्यैरवधिरकारि मासनात्रं सोऽतीतः पुनरपि पञ्चषाश्च घस्राः।
अद्यापि स्वकरणमेत्य स नः सनाथान्कर्तुं तन्मनसि न जायतेऽनुकम्पा ।। ४३ ।।

किं कुर्मः क्व नु मृगयामहेत्वियामहः[11] को जानन्निह वसतीति नोऽभिदध्यात्।
विज्ञातुं कथमिममीश्महे विचिन्त्याप्यासिन्धु क्षितितलमन्यगात्रगूढम्[12] ।। ४४ ।।

१० मुक्ताम्बराऽऽत्तत्रपाः ?।
११. क्व यामः।
१२. गात्र।



गुरुणा करुणानिधिना ह्यधुना यदि नो हृदिनो निहिता विहिता।
जगति क्व गतिर्भजतां त्यजतां स्वपदं विपदन्तकृतं[13] तदिदम् ।। ४५ ।।

इति खेदमुपेयुषि मित्रजने प्रतिपन्न-यतिक्षितिभृन्महिमा।
शुचमर्थवता शमयन्वचसा निजगाद सरोरुहपाद इदम् ।। ४६ ।।

पर्याप्तं नः क्षैभ्यमुपेत्यात्र[14] सखायः कृत्वोत्साहं भूमिमशेषामपि यतिरति।
अन्वेष्यामो भूरिवराण्यथ च द्यां यद्वद्देहं[15] देहमनीषादिषु[16] गूढम् ।। ४७ ।।

अनिर्विण्णचेताः समास्थाय यत्नं सुदुष्टावमर्धं[17] ममाप्नोत्यवश्यम्।
मुहुर्विघ्नजालैः सुरा हन्यमानाः सुधामप्यवापुर्ह्यनिर्विण्णचित्ताः ।। ४८ ।।

यदप्यस्य गात्रप्रतिच्छन्नरूपो दुरन्वेषणः स्याद्गुरुर्नस्तथापि।
स्वभानूदरस्थः शशीव प्रकाशैस्तदीयैर्गुणैरेव वेत्तुं स शक्यः ।। ४९ ।।

इक्षुचापादिगमापेक्षया[18] निर्गतो वर्ष्म तस्योचितं कृष्णवर्त्मत्युति[19]।
विभ्रमाणां पदं सुभ्रुवां भूपतेः प्राप्यमर्हत्यसावाप्तकामाग्रणीः[20] ।। ५० ।।

नित्यतृप्ताग्रयाय्याश्रिते निवृत्ति[21] प्राणिनो शोकमोहादिना नाक्षिताः[22]।
दस्युपीडोज्झिताः स्वस्वधर्मे रताः कालवर्षी स्वराण्मेदिनी कामसूः ।। ५१ ।।

तदिहालस्यमपास्य विजेतुं निरवधिसंसृतिजलधेः सेतुम्।
देशिकवरपदकमलं यामो न ति(?)वृथाऽनेहसमत्र नयामः ।। ५२ ।।

इति जलरुहपदवचनं सर्वे मनसि विधाय निराकृतगर्वे।
कांश्चित्तत्र निवेश्य शरीरं रक्षितुमन्ये निरगुरुदारम् ।। ५३ ।।

ते चिन्वन्तः शैलाच्छैलं विषयाद्विषयं भुवमनुवेलम्।
प्रापुर्धिक्कृतविबुधनिवेशान् स्फीतानमरकनृपते(र्दे)शान् ।। ५४ ।।

मृत्वा पुनरप्युत्थितमेनं श्रुत्वा दैन्यद्विपसमानम्[23]।
त्यक्त्वा विरहजदैन्यममन्दं मत्वाऽऽचार्यं धैर्यमविन्दन् ।। ५५ ।।

ते च ज्ञात्वा गानविलोलं तरुणीसक्तं धरणीपालम्।
विविशुः स्वीकृतगायकवेषाः नगरं विदितसमस्तविशेषाः ।। ५६ ।।

राज्ञे ज्ञापितविद्यातिशयास्ते तत्संग्रहविधृतानुशयाः।
रमणिक(श?)तमध्यगमवनीन्द्रं ददृशुस्तारावृतमिव चन्द्रम् ।। ५७ ।।

१३. विपदन्तकरम्।
१४. क्लैब्य°।
१५. देवं।
१६. देवमनुष्यादि°।
१७. सुदुष्प्रापमर्थं।
१८. इक्षुचापागमा°।
१९. °वर्त्मद्युतिः।
२०. प्राप्तु
२१. निर्वृताः।
२२. नेक्षिताः।
२३. वैन्यदिलीप°।

छत्रछायाशोभिकिरीटं हाटकपट्टोल्लासितललाटम् ।
स्वीकृततनुमिमदनशक्रं श्रितभूतलमिव सवधूचक्रम् ॥ ५८ ॥
वरचामीकरतरुणीकङ्कणरणितमनोहरपश्चाद्भागम् ।
गीतगतिज्ञोद्गीतश्रुतिसुखि[२४]तानसमुल्लसदग्रिमभागम् ॥ ५९ ॥
रुचिरवेषाः समासाद्य तां संसदं नयनसंज्ञावितीर्णासना भूभुजा ।
समतिसृष्टास्ततः सुस्वरं मूर्च्छनापदविदस्ते जगुर्मोहयन्तस्सभाम् ॥ ६० ॥

भृङ्ग तव सङ्गतिमपास्य गिरिशृङ्गे तुङ्गविटपिनि सङ्गमजुषि त्वदङ्गे ।
साङ्ग[२५]रचिताः सङ्गकलुषान्तरङ्गाः सुकृते भङ्गमुपयन्ति भृङ्गाः ॥ ६१ ॥
पञ्चकरसमयसंचयकृते प्राञ्चं मुञ्च निदेह सञ्चकसि प्रपञ्चम्[२६] ।
पञ्चजनमुख पञ्चमुखमप्यनञ्चस्त्वं जगतिरिति[२७] कञ्चरेलवञ्चितोऽसि[२८] ॥ ६२ ॥
पर्वशशिमुख सर्वमपहाय पूर्वं कुर्वदिह गर्वमनुसृत्य हृदपूर्वम् ।
न स्मरसि वस्त्वस्मदीयमिति कस्मात्संस्म(र) तदस्मीति वरमन्मदुक्त्या[२९] ॥ ६३ ॥
मरुमरीचिषु वारिलहरिदूरे नीलशैलत्वमिव जलधिजलपूरे ।
रज्जुखण्डे[३०] कुण्डलीव जगदेतत्प्रतिभाति यत्र तत्र तत्त्वमसि तत्त्वम् ॥ ६४ ॥
नेति नेतीत्यादिनिगमवचनेन निपुणं निषिध्य मूर्तामूर्तराशिम् ।
यदशक्यनिह्नवस्वात्मरूपतया जानन्ति कोविदास्तत्त्वमसि तत्त्वम् ॥ ६५ ॥
जाड्यमुत्पाद्य विश्वमनुप्रविश्य गूढमन्नमयादिकोशतुषजाति ।
कवयो विविच्य युक्त्यवघातरो[३१] यत्र त्वमसि तत्त्वमसि तत्त्वम् ॥ ६६ ॥
विषमविषयेषु संचारिणोऽ(क्षा)श्वान् दोषदर्शनकशाघाततः स्वैरम् ।
संनिवर्त्य स्वान्तरश्मिभिर्धीरा बध्नन्ति यत्र तत्र तत्त्वमसि तत्त्वम् ॥ ६७ ॥
व्यापृता जाग्रदादिष्वनुस्यूतं तेभ्योऽन्यदेव पुष्टेभ्य इव सूत्रम् ।
इति यदौपाधिकत्रयदृढक्त्वेन[३२] विन्दन्ति सूरयस्तत्त्वमसि तत्त्वम् ॥ ६८ ॥
पुरुष एवेदमित्यादिवेदेषु सर्वकारणतया यस्य सर्वात्मत्वम् ।
हाटकस्येदमकुटस्य[३३] तादात्म्यं सरसमाम्नायते तत्त्वमसि तत्त्वम् ॥ ६९ ॥
यश्चाहमत्र वर्ष्मणि भामि सा सा[३४] योऽसौ विभाति रविमण्डले सोऽहम् ।
इति वेदवादिनो व्यतिहारतो यद्ध्यायन्ति तत्त्वतस्तत्त्वमसि तत्त्वम् ॥ ७० ॥

२४. °सुखतान° ।
२५. स्वाङ्ग° ।
२६. पञ्चशर°····कृते ····मुञ्चन्निवेह सञ्चरसि ··· ।
२७. च गतिरिति ।
२८. किं च किल वञ्चितोऽसौ ।
२९. परमस्मदुक्त्या ।
३०. रज्जुषण्डे ।
३१. युक्त्यवघाततो ।
३२. त्रयपृथक्त्वेन ।
३३. हाटकस्येव मुकुटस्य ।
३४. सोऽसौ ।



वेदानुवचनानुवादमुखधर्मैः श्रद्धयानुष्ठितैर्विद्यया युक्तैः ।
विविदिषन्त्यत्यन्तविमलितस्वान्ता ब्राह्मणा यद्ब्रह्म तत्त्वमसि तत्त्वम् ॥ ७१ ॥
शमदमोपरमादिसाधनैर्धरा[३५] स्वात्मनाऽऽत्मनि यदन्विष्य कृतकृत्याः ।
अधिगतामितसच्चिदानन्दरूपा न पुनरिह खिद्यति तत्त्वमसि तत्त्वम् ॥ ७२ ॥
पाहि भगवत्पाद परिपूर्णमोद पाहि परिहृतजीवपरमात्मभेद ।
पाहि परमार्थ योजितसर्ववेद पाहि पटुयुक्तिपाटितभेदवाद ॥ ७३ ॥
अविगीतगीतमेवं नरपतिराकर्ण्य वर्णितात्मार्थम् ।
विससर्ज पूरिताशानेतान्विज्ञातकर्तव्यः ॥ ७४ ॥
स युगमिव मन्यमानं स्वविरहसमयं क्षणार्धमपि ।
पश्यन् क्रीडासचिवं कान्ताचक्रं कृपां चक्रे ॥ ७५ ॥

अमरकनरपालं तद्वपुः प्रापयित्वा निरवधिमहिमाऽसौ प्राविशत्तां तनूं स्वाम् ।
न हि भवति कदाचिद्दुःखदोषानुषङ्गो रचितपरिचयानां देहिनां तादृशेषु ॥ ७६ ॥
स शिखरिवरकुहरग्रावशय्यानिषण्णो दशशतदलजलजे चिन्तयंस्तत्त्वमाद्यम् ।
अपजयमृगविहगैरन्तिकेऽन्वास्यमाने नः?[३६] परिहृतनटतनुभिः
शिष्यवर्गैर्व्यलोकि ॥ ७७ ॥
तदनुनयति कुञ्जरो विनेयैश्चिरविरहादतिवर्धमानहार्दैः ।
सनक इव (वृ)तः सनन्दनाद्यैर्निरगमदम्बरवर्त्मनाद्रिशृङ्गात् ॥ ७८ ॥
स नगरमवतीर्य पूर्वदृष्टं गगनपथाद्गलितक्रियाभिमानम् ।
विषविषयनिवृत्ततर्षमुच्चैरकुरुत मण्डनमिश्रमक्षि(पा)त्रम् ॥ ७९ ॥
तं समीक्ष्य नभसश्च्युतं स च प्राञ्जलिः प्रणतपूर्वविग्रहः ।
अर्हणाभिरभिपूज्य तस्थिवानीक्षणैरनिमिषैः पिबन्निव ॥ ८० ॥
प्रेयसा प्रथमर्चितं मुनीन्द्र(मा)त्तविष्टरमुपस्थितं बुधैः ।
प्रश्रयापनतमूर्तिरब्रवीच्छारदाऽभिवदने विशारदा ॥ ८१ ॥
ईशानः सर्वविद्यानामीश्वरः सर्वदेहिनाम् । ब्रह्मणोऽधिपतिर्ब्रह्मन् भवान्
साक्षात्सदाशिवः ॥ ८२ ॥
सदसि मामविजित्य तदैव यन्मदनशासन कामकलास्वपि ।
तदवबोधकृते कृतिमाचरस्तदिह मर्त्यचरित्रविडम्बनम् ॥ ८३ ॥
त्वया यदाहं विजिता परात्मना न तत्कृपामावहतीडच[३७] सर्वथा ।
कृताभिमातिर्न[३८] मयूखमालिना निशाचरादेरपकीर्तये खलु ॥ ८४ ॥

३५. धीराः ।
३६. °न्वास्यमानः ।
३७. तत्रपा° ।
३८. कृताभिभूतिर्न ।

आदावात्म्यं धाम शमं प्रयास्याम्यर्हस्याद्या मामनुज्ञातुमर्हन् ।
इत्यामन्त्र्याऽन्तर्भूतां योगशक्त्या पश्यन् देवीं भाष्यकर्ता बभाषे ॥ ८५ ॥
जानामि त्वां देवि देवस्य धातुर्भार्यामिष्टामष्टमूर्तेः सगर्भ्याम् ।
वाचामाद्यां देवतां ए(वि?)श्वगुप्तै चिन्मात्रामप्यात्तलक्ष्म्यादिरूपाम् ॥ ८६ ॥
तस्मादस्मत्कल्पितेष्वर्च्यमाना स्थानेषु त्वं शारदाख्या दिशन्ती ।
इष्टानर्थानृष्यशृङ्गाश्रमादि(केषु) क्षे(त्रे)ष्वास्स्व प्राप्तसत्संनिधाना ॥ ८७ ॥
तथेति संश्रुत्य सरस्वती सा प्रायात्प्रियं धाम पितामहस्य ।
अदर्शनं तत्प्रसमीक्ष्य सर्वेऽप्याकस्मिकं विस्मयमीयुरुच्चैः ॥ ८८ ॥
तत्रोषित्वा कांश्चन मासान् ग्रन्थानुद्यत्स्वात्मविकासान् ।
संख्यावद्भ्यः साधनभाग्यः[40] स व्याचख्यौ संयतवाग्भ्यः ॥ ८९ ॥
मण्डनमिश्रोऽप्यथ विधिपूर्वं दत्वा वित्तं यागे सर्वम् ।
आत्मारोपितशोचिष्केशो भेजे शङ्करमस्तभवाशः ॥ ९० ॥
दृष्ट्वा तुष्टलसग्दुण जातु शीघ्रो भाभिर्नित्यमुपेतम् ।
प्रादात्तस्मै वेदरहस्यं मोक्षापेक्षी शश्वदुपास्यन् ॥ ९१ ॥
ततः समासाद्य सुरेश्वराख्यां दिगङ्गनाभिः क्रियमाणसख्याम् ।
सच्छिष्यतां भाष्यकृतः स मुख्यामवाप तुच्छीकृतधातृसौख्याम् ॥ ९२ ॥
इति वशीकृतमण्डनपण्डितः प्रणतसत्करणत्रयदण्डितः ।
सकलसद्गुणमण्डलमण्डितः स निरगात्कृतदुर्मतखण्डितः ॥ ९३ ॥
कुसुमितविविधपलाशभ्रमदलिगीतमधुरनिःस्वानम् ।
पश्यन्विपिनमयासदा शान्ती सा श[41]पालितामेषः ॥ ९४ ॥
तत्र महाराष्ट्रमुखे देशे ग्रन्थान्प्रचारयन्प्राज्ञतमः ।
शमितमतान्तरमानः शनकैः सनकोपमोऽग(म)च्छैलम् ॥ ९५ ॥
प्रफुल्लमल्लिकावनप्रसङ्गसङ्गतामितप्रकाण्डगन्धबन्धुरप्रवातधूतपादपम् ।
सदा मदद्विपाधिपप्रहारशूरकेसरिव्रजं भुजङ्गभूषणाप्रियं स्वयम्भुकौशलम् ॥ ९६ ॥
कलिकल्मषभङ्गायां सोऽद्रेराराच्चलत्तरङ्गायाम् ।
अधरीकृतगङ्गायां सस्नौ नद्यां पयोधिसङ्गायाम् ॥ ९७ ॥
नमन्मोहभङ्गं नभोलेढिशृङ्गं[42] त्रुटत्पादसङ्गं रटत्पक्षिभृङ्गम् ।
समाश्लिष्टगङ्गं प्रहृष्टान्तरङ्गं तमारुह्य तुङ्गं ददर्शेशलिङ्गम् ॥ ९८ ॥
प्रणमद्भवबीजभंजनं प्रणिपत्यामृतसंपदार्जनम् ।
प्रमुमोद स मल्लिकार्जुनं भ्रमराम्बासचिवं नतार्जुनम् ॥ ९९ ॥
तीररुहैः कृष्णायास्तीरे वातात्तिरोहितोष्णाया ।
आवर्जिततृष्णाया आचार्येन्द्रो निरस्तकृष्णायाः ॥ १०० ॥

३९. अन्तर्हितां ।
४०. साधनभाजः ? ।
४१. °मयासदाशां कीनाश° ।
४२. °लेहि° ।



तत्रातिचित्रपदमत्रभर्दा पवित्र[43] कीर्तिर्विचित्र(सुचरित्र)निधिः सुधीन्द्रान् ।
अग्राहयत्कृतमसद्ग्रहनिग्रहार्थमग्र्यान्समग्रगुणवान्महदग्रयायी ॥ १०१ ॥
अर्थापयन्तमसदर्थनिरासपूर्वं कीर्तन्य[44]तीर्थयशसं श्रुतिभाष्यजातम् ।
आक्षिप्य पाशुपतवैष्णववीरशैवमाहेश्वराश्च विहिता[45]हि सुरेश्वराद्यैः ॥ १०२ ॥
केचिद्विसृज्य मतपात्म्यममुष्य शिष्यभावं गता विगतमत्सरमानदोषाः ।
अन्ये तु मन्युवशमेत्य जघन्यचित्ता निन्युः क्षणं निधनमस्य निरीक्षमाणाः ॥ १०३ ॥
वाणी काणभुजेन चैव[46] गणिता लीना क्वचित्कापिली ।
श पञ्चाशिवभावमेति[47] भजते गर्हापदं चार्हतम् ।
दौर्गं दुर्गतिमश्नुते भुवि पुनः पुष्णाति को वैष्णवं
निष्णातेषु यतीशसूक्तिषु कथाकेलीकृतासूक्तिषु ॥ १०४ ॥
इत्यसन्मतिनिर्मितश्रुतिबाह्यदुर्मतशातनैर्नूतनैरमृतोतैरिवोद्धृतयातनैः श्रुतिकेतनैः ।
पारिकांक्षिमहीप...जभाषणैरघशोषणैर्मोहसागरमग्नमातुलमुद्धरन् जगदाबभौ ॥ १०५ ॥

॥ इति श्रीमद्भरद्वाजकुलजलधिचन्द्रश्रीतिरुमलकोण्डोपाध्यायतनय-
श्रीमत्परमशिवेन्द्रपादाब्जसेवापरायणश्रीतिरुमलदीक्षितविरचिते
शङ्कराभ्युदये महाकाव्ये षष्ठः सर्गः ॥

## ( अथ सप्तमस्सर्गः । )

**॥ श्रीमद्भगवत्पादचरणारविन्दाभ्यां नमः ॥**

तत्रैकदाच्छादितनैजदोषः पौलस्त्यवत्कल्पितसाधुवेषः ।
निर्मानिमावस्थितकार्यशेषः[1] कापालिकः कश्चिदनल्पदोषः ॥ १ ॥
असार[2]पश्यन्मदनाद्यवश्यं वश्येन्द्रियाश्वैर्मुनिभिर्विमुश्यम्[3] ।
आदिश्य भाष्यं सपदि प्रशस्यमासीनमाश्रित्य मुनिं रहस्यम् ॥ २ ॥
दृष्ट्वैव हृष्टः स चिरादभीष्टं निर्धार्य संसिद्धमिव स्वमिष्टम् ।
महद्विशिष्टं निजलाभतुष्टं विसृष्टमाचष्ट च कृत्यशिष्टम् ॥ ३ ॥
गुणांस्तवाकर्ण्य मुनेऽनवद्यान् सार्वज्ञसौशील्यदयालुताद्यान् ।
द्रष्टुं समुत्कण्ठितचित्तवृत्तिर्भवन्तमागां विदितप्रवृत्तिः ॥ ४ ॥
त्वमेक एवात्र निरस्तमोहः पराकृतद्वैतिवचःसमूहः ।
आभाति दूरीकृतदेहमानः शुद्धाद्वये योजितसर्वमानः ॥ ५ ॥

४३. °भवान्° ।
४४. किंत्वन् ।
४५. विजिता ।
४६. काणभुजी च नैव ।
४७. शैवं चाशिव° ।
१. निर्मानिमायं स्थित° ।
२. असावप° ।
३. विमृग्यम् । *Or* विमृश्यम् ।

परोपवृतै[4] प्रगृहीतमूर्तिरमर्त्यलोकेष्वपि गीतकीर्तिः ।
कटाक्षलेशार्चित[5]सज्जनार्तिः सदुक्तिसम्पादितविश्वमूर्तिः[6] ॥ ६ ॥
गुणाकरत्वाद्भुवनैकमान्यः समस्तवित्त्वादभिमानशून्यः ।
विजित्वरत्वाद्गलहस्तितान्यः स्वात्मप्रदत्वाच्च महावदान्यः ॥ ७ ॥
अशेषकल्याणगुणोदयेषु परावरजेषु भवादृशेषु ।
शौर्यार्थिनः क्वाप्यनवाप्यकामं न यान्ति दुष्प्रापमपि प्रकामम् ॥ ८ ॥
तस्मान्महत्कार्यमहं प्रपद्य निर्वर्तितं सर्वविदा त्वयाद्य ।
कपालि[8] संप्रीणयितुं यतिष्ये कृतार्थमात्मानमतः करिष्ये ॥ ९ ॥
अनेन देहेन सहैव गन्तुं कैलासमीशेन समं च रन्तुम्
अतोषयन्ती प्रतपोभिरुग्रं[9] सुदुष्करैरब्दशतं समग्रम् ॥ १० ॥
तुष्टोऽब्रवीन्मां गिरिशोऽमुमर्थमभीप्सितं प्राप्स्यसि मत्प्रियार्थम् ।
जुहोषि चेत्सर्वविदः शिरो वा हुताशने भूमिपतेः शिरो वा ॥ ११ ॥
एतावदुक्त्वाऽन्तरधान्महेशस्तदादि तत्संग्रहणे धृताशः ।
चराम्यथापि क्षितिपो न लब्धो न सर्ववित्त्वत्र मयोपलब्धः ॥ १२ ॥
दिष्टयाऽद्य लोकस्य हिते चरन्तं सर्वज्ञमद्राक्षमहं भवन्तम् ।
इतः परं सेत्स्यति मेऽ(नु)बन्धः सद्दर्शनान्तो हि जनस्य बन्धः ॥ १३ ॥
शिरःप्रदानेऽद्भुतकीर्तिलाभस्तवापि लोके मम सिद्धिलाभः ।
आलोच्य देहस्य च नश्वरत्वं यद्रोचते गत्तदु(?) तत्कुरु त्वम् ॥ १४ ॥
दधीचिमुख्याः क्षणिकं शरीरं त्यक्त्वा परार्थे स्म यशःशरीरम् ।
प्राप्य स्थिरं सर्वगतं जगन्ति गुणैरनम्यै[10] खलु रञ्जयन्ति ॥ १५ ॥
यदप्यदेयं ननु देहवद्भिर्मयार्थितं गर्हितमेव सद्भिः ।
तथापि सर्वत्र विरागवद्भिः किमस्त्यदेयं परमार्थविद्भिः ॥ १६ ॥
प्रयच्छ शीर्षं भगवन्नमः स्तादितीरयित्वा पतितं पुरस्तात् ।
तमब्रवीद्वीक्ष्य सुधीरधस्तात्कृतकृदावृत्तमनाः[11] समस्तात् ॥ १७ ॥
नैवाभ्यसूयामि वचस्त्वदीयं प्रीत्या प्रयच्छामि शिरो मदीयम् ।
को वाऽर्थिसात्प्राज्ञतमो नृकायं जानन्न कुर्यादिह बह्वपायम् ॥ १८ ॥
पतत्यवश्यं हि विकृष्यमाणं कालेन यत्नादपि रक्ष्यमाणम् ।
वर्ष्मामुना सिध्यति चेत्परार्थः स एव मर्त्यस्य परः पुमर्थः ॥ १९ ॥

४. परोपकृत्यै ।
५. °लेशार्दित° ।
६. °विश्वपूर्तिः ।
७. परावरज्ञेषु ।
८. कपालिनं प्रीणयितुं ।
९. अतोषयं तीव्रतपोभि ।
१०. °रनर्घ्यैः ।
११. कृपालुरावृत्त°



वर्ते विविक्ते तदहं समाधौ क्वचिन्निशीथेऽस्तमिताखिलाधौ ।
छित्वा कृपाणेन शिरः परेद्युर्नयाऽस्मदीयाश्च यथा न विद्युः ॥ २० ॥
तथेति चान्येद्युरसिं प्रगृह्य प्रापाऽर्धरात्रेंऽघ्रिरवं निगृह्य ।
संकेतितं स्थानमलक्षितोऽसौ योगीश्वरे स्वात्मनि संयतासो ?
(सुः or तोऽसौ ?) ॥२१॥
विलोकयामास स लोकपूज्यं स्वसौख्यतुच्छीकृतदेवराज्यम् ।
योगीशमासादितनिर्विकल्पं सनत्सुजातप्रभृतेन[12] कल्पम् ॥ २२ ॥
जत्रुप्रदेशे चुबुकं निधाय व्यात्तास्यमुत्तानकरौ निधाय ।
जानूपरि प्रेक्षितनासिकान्तं विलोचने सादु[13] निमील्य कान्तम् ॥ २३ ॥
आसीनमृज्वीकृतपूर्वगात्रं सिद्धासने शेषितबोधमात्रम् ।
चिन्मात्रविन्यस्तहृषीकवर्गं समाधिविस्मारितविश्वसर्गम् ॥ २४ ॥
विलोक्य तं हन्तुमुपास्तशङ्कः स्वबुद्धिपूर्वार्जितविप्रकम्पः[14] ।
प्राचोद्यतासिः[15] सविधं न यावत्प्रज्ञानवान् पद्मपदोऽपि तावत् ॥ २५ ॥
स तत्क्षणक्षुब्धनिजस्वभावः प्रवृद्धरुड्विस्मृतमर्त्यभावः ।
आविष्कृतात्युग्रनृसिंहभावः समुत्पपातातुलितप्रभावः ॥ २६ ॥
सटाच्छटास्फोटितमेघसङ्घस्तीव्रार(व)त्रासितभूतसङ्घः ।
(संवेगसंमूर्च्छितलोकसंघः किमेतदित्याकुलदेवसंघः) ॥ २७ ॥

[ Incomplete ]

१२. प्रभृतेरनल्पम् ।
१३. सामि ।
१४. °तीव्र° ।
१५. प्राचोद्यतासिः ।